
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

पं. द. १३
१६१ न्यायरत्न प्रकरण
शशधर पत्रे १०४

Accession No:- ~~354~~ M1290
Title:- न्यायसिद्धान्तदीप
(न्यायरत्न प्रकरण)
Subject:- न्याय:
Author. शशधर
Date:- A.D. 1531
पत्रे - 104
।ल।

ॐ श्रीगणेशाय नमः ॥ ध्वंसितपरसिद्धांतध्वांतं गोतममतेकसिद्धांतं
प्रकाशयति ॥ १ ॥ न्यायसिद्धांतदीपायं कथास्वविजिगीषुभिः ॥ नत्वा नित्यमधीशं शशधरशर्मा
प्रदेशः ॥ २ ॥ इह तावदभीष्टकर्मणो निर्विघ्नपरिसमाप्तिमुद्दिश्य बहुशः प्रयत्नेन सत्तर्कस्त्वेदस्तु
दधिदूर्वादौ मंगले दृश्यंते प्रेक्षावंतः ॥ तत्र मंगलस्य तद्विघ्नध्वंसस्य वा नमस्कारस्य प्रवर्त्तमाना विनायकादीन
नाशयन्सारणद्वारेणाभीष्टसमाप्तिं प्रतिकथमुपायत्वं ग्राह्यं ॥ श्रुतेरिति चेन्न ॥ तथाविधश्रुतेरनाक
लनात् ॥ शिष्टाचारात्तदनुमानमिति चेन्न ॥ शिष्टाचारस्यानिर्वचनात् ॥ तथाहि ॥ किं शिष्टाचारस्य
त्वं वेदप्रामाण्याभ्युपगंतृपुरुषो साधमानत्वं वा ॥ उद्देश्यत्वविशिष्टमेतदेव वा ॥ एवंभूतपुरुषेण
वेदमूलकतया स्वीक्रियमाणत्वं वा ॥ वेदमूलकतया प्रमीयमाणत्वं वा ॥ वेदोपदिष्टकर्तव्यताकक्रिया
त्वमेव वा ॥ अन्यथा नाद्यः ॥ तथाविधपुरुषक्रियमाणजलताडनादेरपि शिष्टाचारत्वप्रसंगात् ॥

त्वात्। मंगलमात्रसाधारणत्वात्। न च मंगलमात्रस्यैव नमस्कारत्वं तथाव्यवहारात्। नाव
श्यकायिकादित्रिकसाधारणत्वौ जातिविशेष एव नमस्कारत्वं सांकर्यप्रसंगात्। एवं मंगल
त्वमपि अशक्यनिर्वचनं। विघ्नोत्सारणासाधारणत्वस्यानुगतस्यानुपस्थितावपरिच्छेद्यत्वात्।
न च प्रकृतोपस्मृतौ वा मंगलत्वाद्यातिधेयं तद्देव मंगलं। प्रवृत्तिनिमित्तस्यापि तदतिधेयत्वेन मंग
लत्वप्रसंगात्। न च मंगलत्वाद्यातिधेयत्वं विशेष्यं यत्तदेव मंगलं। एतावद्व्रतिसंक्षेपेनेपि मंग
लत्वव्यवहारा[illegible]त्। अन्यस्यापि विशेष्यत्वे सति मंगलत्वाद्यातिधेयत्वसंभावनायां संदिग्ध
व्यभिचारत्वात्। अपि च विघ्नवतो नमस्कारादावधिकारः। तथा चाधिकारनिश्चयं विना क
थं प्रवृत्तिः। न चात्मनो विघ्नवत्त्वं केनापि प्रमाणेन ग्रथमत एवतेनावधारितं। न च विघ्नज्ञान
वतो अधिकारित्वं संशयस्यापि ज्ञानत्वमस्त्येव। तथा च विघ्नसंशये प्यधिकारात्र व्यवहारस्य

तथा च तेनापि वेदानुमानं स्यात् । न द्वितीयः । घटादेरपि शिष्टाचारत्वप्रसंगात् । न तृतीयः । अवेद
मूलेऽपि वेदमूलकत्वभ्रमात् तथाविधत्वात् तत्पुरुषस्वीकारसंभवेनातिव्यापकत्वात् । न चतुर्थः । प्र
कृते तदसिद्धेः । तथाहि नमस्कारो वेदबोधितत्वेनाभीष्टोपायताकः वेदमूलकतया प्रमीयमाणत्वा
दित्यत्र साध्यसमो हेतुः । अत एव न पंचमः । नाप्येतदनिर्वचनात् । किं च शिष्टाचारत्वेन वेद
दनुमानात् सूपस्वावादलेते न श्रुतिमनुमाय तयाऽभीष्टोपायतावगमकल्पनया । किं च मंगलस्याभी
समाप्तिं प्रति कारणत्वे कथं तद्व्यतिरेकेण प्रमत्ताद्यनुष्ठितानामिष्टसमाप्तिः । कथं वा सांगे तस्मिन्न
नुष्ठितेऽपि कार्यानुदयः । श्रौतानां सांगानां कर्मणः फलावश्यंभावात् । अन्यथा फलव्यतिवारशंक
या नित्यं काम्यागादौ न प्रवर्त्तेत । किं च । किं नमस्कारत्वं न तावद्विघ्ननिवारकत्वं अदृष्टादावति
व्यापकत्वात् । नापि तद्वारणसाधारणकारणत्वं अनुगतरूपापरिचये कारणत्वस्यैव दुर्ग्रह

रूपतत्कारणत्वेष्यमाणत्वात्। यत्तु न रूढ्या कथं वा सांगे तस्मिन्ननुष्ठितेपि कार्यानुदयः श्रौतस्य सां
गस्य कर्मणः फलावश्यंभावनियतत्वादिति। तदपि मंदं। क्वचिद्विघ्नस्य प्रचुरत्वात्। अंतरा विघ्नान्त
रोत्पत्तेर्वा। विघ्नविरहदशायां तु तस्य मंगलस्य प्रत्यूहद्वारस्यान्यथासिद्धत्वात् तद्व्यक्तौ कार
णता नास्ति तथापि व्यक्त्यंतरं प्रति जन्मांतरे तस्मिन्नेव वा जन्मनि जनकतानपायिनीति को
विरोधः। न हि तद्व्यक्त्यपेक्षया कारणतां ब्रूमः इति बोध्यते। किं तु जातीयापेक्षया। अत एव क्वचि
न्नमस्कारादर्शनेपि अभीष्टसमाप्तिरुदेति। न च श्रौतस्य सांगस्य कर्मणः फलोत्पादनियमः
फलमवश्यं दपिकारीर्तनादिना तद्विना शावधारणात्। नमस्कारत्वं नुपपद्यते विकापि कादौ नान्व
गतमनुपलक्ष्यते तथा ज्ञानविशेषस्यैव पूर्वकत्वम् अप्रतिसंधाय न कायिकादौ नमस्कारत्वमुपदर्श
इति नागृहीतविशेषणन्यायेन ज्ञानविशेष एव नमस्कारत्वं वास्तु विशेषो व्यवहारः सात्त्विको

३

त्तिरुपपन्नैवेतिवाच्यं। एवं हि सति वस्तुतो निर्विघ्नेन विघ्नसंशयवता समारब्धान्मंगलात्फलो
दयप्रसंगः अधिकारिविशेषणत्वस्य सांगस्य कर्मणः फलोपधाननियमादिति॥ ॥अत्रोच्यते॥ ७॥
क्षीणदोषपुरुषत्वमेव शिष्टत्वं। तथा च तत्वं च मन्वादीनामेव सुप्रसिद्धं। तदाचारत्वं च तेन प
रलोकानुकूलतया क्रियमाणत्वात्। तत्प्रेनोतिबंधककदुरितवारणमुद्दिश्य क्रियमाणत्वं वा। अथ
मेवकारीयर्दो व्याप्तिः सुप्रसिद्धा। यत्कार्यं प्रतियस्य कारणत्वमन्वयव्यतिरेकोपजीवनेन न
गृह्यते तत्कार्यमुद्दिश्य विशिष्टेन तेस्यं क्रियमाणत्वमेव शिष्टाचारत्वं। एवमन्यदप्युह्यं॥ न च
शिष्टाचारत्वेनैव नमस्कारादीनामभीष्टसमाप्त्युपायतानुमानसंभवेपि किमिति तदर्थं श्रु
तिकल्पनेति युक्तं। व्याप्तिबलेन श्रुतेः कल्पनात्। तथाहि आचारस्य श्रुतिव्याप्तत्वात्। न च प्रम
नाद्यनुष्ठितकर्मसमाप्तौ व्यभिचारदर्शनात्कारणान्तरमंगलस्येति युक्तं। तत्रापि पूर्वजन्म

ना

जातिरेद एवानन्तु साक्षात्कारित्वादि परापरत्वानुपपत्त्या कथमेतत्संगच्छते। कथं वा न तथा
भूतप्रमारूपा साक्षात्कारफलकरणस्य प्रमाणान्तरत्वं। कुतो वा साक्षात्कारप्रयोजकप्रमाण
विरहे तथाभूतसाक्षात्करणानुभवरूपफलसिद्धिरिति। मैवं। साक्षात्कारित्वस्यैव मान
सत्यतथात्वात्। तथापि किं विशेषकोऽसौ। आराधकात्मविषय एव। आराधनीयात्मविष
यको वा। न चाप्रमाणं तदापत्तिः। मनस एव तत्करणत्वात्। न च मनसो नैव हिरस्वातंत्र्यं। आ
त्मविशेषगुणे प्रत्यक्षेण बहिरपि तस्य साक्षात्कारिज्ञाने प्रवृत्तिदर्शनादित्यन्यत्र विस्तरः।
गुणगतजातौ परापरजात्यनुपपत्तिरेव नास्तीत्यन्ये। यद्वा कायिकादिषु नमस्कारत्वा
वान्तरार्थः। तदन्यतमत्वमेव वा नमस्कारत्वं। एवं विघ्नासमरणासाधारणकारणत्वे सति
साध्यत्वमेव मंगलत्वं। कारणता च दृष्टविनायकार्चनत्वादिनैवेति न किंचिदनुपपन्नं॥

२।०

मू०

वस्कतो निर्विघ्नेन समारब्धे कर्म्मणि या गतिः सा दर्शिता वा। सोयं नमस्कारो नांगे विघ्न वतो वि
घ्न ज्ञानवतो वा नमस्कारेऽधिकारात्। परिसमाप्तौ च विघ्न शून्याधिकारात्। न चाधिका
रत्वेदे नांग प्रयोजनाभावो भवति। अंतराय विरह पूर्वक प्रारिप्सित समाप्तिकामो वा तत्रा
धिकारी। तथैवाचारात्। कर्मसमारंभे च तत्समाप्तिकाम एव तथाप्यधिकारित्वेद एव॥

ना पि नैमित्तिकः। अकरणे प्रत्यवायप्रसंगात्। न चात्रानुमितिरेव निस्तारायाप्राप्ति
तानुपदेशात्। तस्मात्स्वधर्मनमेवेदं। न चैवमन्यदापिकरणत्वप्रसंगः। नियतसमयकर्त्त
व्यत्वात्। तथैवाचारात्। इष्टापत्तेर्वा। सोयं नमस्कारः क्वचिद्दैहिकः क्वचिद्वाचिकः मानसः
वाचारात्। नन्वनः कारीरीवद्दैहिक एवेत्यन्य वधानत्वात्। इति दिक्॥ मंगलप्रकरणं॥ ॥१०॥
अंधकारे विप्रतिपत्तिः॥ अंधकारस्त्वं भावव्रत्तिर्न वा। अंधकारत्वं भाववृत्ती। तितेतातितिना न

२।३

४

एतेनारोपितं रूपं तमइत्यपि परास्तं। अनुभवापि नीलीद्रव्योपरक्ते श्वेतवस्त्रवच्च तमसि श्वेतमो व्यवहारस्य
संगीतात्। गुणेऽश्वेत्कादयं त्रुटेसीतिबुध्वा नीलं तम इति प्रयोगसंभवेऽगाच्च। किं चायमन्धकारो
समवेतो वास्याद्द्रव्यान्यसमवेतो वा द्रव्यसमवेतो वा। असमवेतोपि जातिमान्न वा। आद्ये द्रव्यं स्या
न्न गुणः। द्वितीये तु समवायाभावयोरन्यतरत्वप्रसंगः। तथा विभुत्वव्याघातः। न द्वितीयः गुणत्व
व्याघातात्। नापि तृतीयः पृथिव्यादिभिन्नवस्तुसमवेतत्वात्। न पृथिव्यादौ नायं दिक्कालमनोगुणः प्र
त्यक्षत्वात्। नाप्यात्मसमवेतः चाक्षुषत्वात्। अत एव न नभसो न तस्वतोः। नापि तेजसस्तेन समं विरोध
न्। तेजोरूपाविषयकचाक्षुषप्रतीतिविषयत्वाच्च। न च तेजोरूपं तमः। अश्लेषात्स्थिरत्वान्नाश्रयत्वा
नाश्रयत्वात्। इह नीलत्वप्रत्यक्षं चेदाश्रयसंपर्कान्नीलबुद्धिस्त्विति चेत्। न। तथाभूताश्रयानुपलम्भात् विशा
नत्त्वहृत्परं प्रकाराकत्वप्रसंगाच्च। नापि पृथिवीजलयोः तद्रूपं पृथक्कारत्वव्यवहाराभावात्। न चोपल

लो ३

नेति वैशेषिकादयः। तत्र परेषामयमाशयः। यथा घटादीनां नीलत्वं प्रत्यक्षसिद्धं तथा तमसोऽपि। न हि नील
तम इति भ्रमः। तथात्वे प्रमाणाभावात्। अभावत्वे तु प्रतियोगिविशेषोल्लिखप्रसंगात्। एवं च तस्याप्य
स्यालोकाभावत्वे आलोकस्यैव तदभावत्वं किमिति नाङ्गीक्रियते। भावत्वसाधकस्यात्र यत्रापि तुल्यत्वा
त्। ननु भावपक्षे तन्नीलबाधकसद्भावादतिरिक्तस्य भावस्याप्रामाणिकत्वाद्भावविशेषबाधे नन्नी
लत्वमेवास्य बाधितं। तथा हि। न तावत्सामान्यमसदातनत्वात्। सामान्यं च सत् द्रव्यवृत्ति वा स्याद्गु
णवृत्ति वा कर्मवृत्ति वा। नाद्यः द्रव्याभावेऽपि गतं तम इति प्रतीतेः। नेतरः। रूपाद्यवृत्तितया गुणत्वम
ण्त्वात्। नान्त्यः कर्माभावेऽपि तत्समानत्वात्। नातिरिक्तवृत्ति। अन्यस्य सामान्यवतोऽभावात्। प्रत्य
क्षत्वादनित्यत्वाच्च न विशेषोऽपि। नापि समवायः संबंधत्वेनानवगमादनित्यत्वाच्च। नापि गुणश्च
तुर्विंशतावनन्तर्भावात्। नीलरूप एवास्यान्तर्भाव इति चेत्। न नीलरूपं तम इति प्रत्ययाभावात्॥

तमहत्वसमानाधिकरणोद्भूतस्पर्शयोग्यत्वादिति वक्तुं गृह्यत एव विविच्य न गृह्यते । स्वरूपत्वादिति भ्रां
वः । अनेन रूपेण स्पर्शयोग्यतैव नास्ति किंतु महत्त्वविशेषसामानाधिकरण्येन । सत्त्वविशेषः कार्यैको
न्नेयः । अत एव त्रसरेणुस्पर्शस्यायोग्यत्वात् । त्रसरेणुर्न स्पार्शन इति केचित् । जलादित्रिकव्यक्तिकस्तु
स्फुट एव । न च तेजोविशेषस्तमः स्यादिति तेजसा सह विरोधात् । तद्विरोधी तेजोंतरमेवेदमिति चेन्न
नासत्सु तेषु रत्नादिषु छायारूपं तमो न स्यात् । रत्नादिप्रतापास सह विरोधात् । अनतिरिक्तता तया तया
सह विरोधः सा वा तिरस्कृतेति चेन्न । न । पृथिव्यादिना तेजसोऽनभिभवात् । तेजोंतरस्यानिलावकस्या
नुपलंभात् । न च छायापने न इति चेत् । बहुत्वतमतमसि तदग्रहप्रसंगात् । न च तेजोंतरमेवानिला
वकं तस्यानुपलंभात् । तेजोनितानकस्य छायानितावकवापातात् । नापि विद्युच्चक्षुर्बाप
कत्वादनित्यत्वाच्च । न मनः प्रत्यक्षत्वात् । तस्माद्द्रव्यविशेषबाधकाभावत्वमस्य बाधितमिति । मेवं ।
रूपवत्त्वपरिमाणवत्क्रियावत्त्वादिना द्रव्यत्वस्यैवोचितत्वात् । न च पृथिव्यादिनवकानंतर्भावाद्

स्पर्शो न

६

न्यमानरूपातिरिक्तमेव पृथिव्या जलस्य वा रूपं एकत्रैकदा रूपद्वयासमावेशात् । आलोकं विना तद्रूपग्राह्य
षत्वाविरोधाच्च । तज्ञातावच्छेदेनोपलभ्यायाविरोधे न परिहृतत्वात् । नापि कर्मचलनात्मकत्वात् उपलभ्य
मानत्वात् । अंधकारवति गृहे दीपचलनेति प्रत्ययप्रसंगाच्च । नापि द्रव्यं पृथिव्यादिर्बहिर्भूतत्वात् । ननु
नीलरूपवत्वे न पृथिव्यामेवासावंतर्भवतु उद्भूतरूपस्य पार्थिवस्योद्भूतस्पर्शवत्वानियमो
सिद्ध एव । इंद्रनीलप्रभासद्व्यतिरेकेण नीलभागे न व्यभिचारात् । तदीयस्पर्शस्यायोग्यत्वेपि नीलरूपस्य यो
ग्यत्वात् । न चोद्भूतस्पर्शेंद्रनीलमणिरूपमेव प्रभायामारोप्यते इति युक्तं । इंद्रनीलग्रहव्यतिरेकेपि
तत्प्रभायां नीलरूपस्य दर्शनादिति मैवं ॥ एवं तु तस्योदाहरणस्यासिद्धेः । सिद्धावपि इंद्रनीलस्य वा
न्यस्य वा स्पर्शमाणस्यैव रूपस्यारोपणान्यथासिद्धौ तत्सहचरितया तथा तन्नीलभागाकल्पनात् ।
न च ज्ञाताज्ञातगतिमरीचिस्थोद्भूतरूपस्य पार्थिवेन व्यभिचारः । स्पर्शनानंतरमुपलभ्यमानज्वाल
मरीचिस्थस्पर्शभागवत्तस्याप्युदाहृतस्पर्शवत्वानुमानात् । तर्हि त्रसरेणुस्पर्शः किमिति नोपलभ्य

चेत्तथात्वे तत्संयोगस्तावाद्यानेचेत्तदृष्ट्यात्कृष्ससंगात्कोरस्यतथात्वेनालोकसंबंधव्यतिरेकाद्विकविद
पिव्यतिरेकसिद्धिरित्याशंक्य। प्रमाणबलात्तेजोव्यतिरेकेणैव नविशेषणीयमितियदितदातमोव्यति
रेकेणापिप्रमाणबलादेवविशिष्यतां। प्रत्यक्षतएतस्यवाह्यालोकव्यतिरेकसहकृतचक्षुर्ग्राह्यत्वा
वधारणाबलेनपृथिव्यादेर्बाह्यालोकसापेक्षचक्षुर्ग्राह्यत्वाभावत्वंस्यज्यतां। इन्द्रियांतरमेवनात
मोग्राहकमस्तुअतत्त्वतामसादिंद्रियादंधतमसेपिपचकारीनांतदेवस्तुग्राहकं॥ स्यादेतत्तमःकिं
नित्यमनित्यंवा। आद्येरूपवतोनित्यस्यावाकृष्टत्वप्रसंगात्। द्वितीयेत्वावरत्वंस्यात्। नचनित्यस्य
रीद्रव्यस्यारंभकत्वं। द्रव्यसमवायिकारणतायांस्पर्शवद्द्रव्यत्वस्यप्रयोजकत्वात्। नचमूर्त्तत्वमेवतत्र
प्रयोजकं। मनसोप्यारंभकत्वप्रसंगादिति। एतदपिन। रूपवत्वेनित्यत्वेपिचेष्टत्वाकृष्टत्वस्वीकारात्। नाम
नसिमूर्त्तत्वानंगीकारात्। अनुद्भूतस्पर्शएवचाकल्प्यतां। नचोद्भूतनीलरूपस्यानुद्भूतस्पर्शसामानाधिक
रण्यनियमः। पृथिव्यामेवतथात्वात्। एवंसत्यनुद्भवोपिकल्प्यतां। तेजोवन्नीरसत्वमेवांगीक्रियतां। त

धितस्य द्रव्यत्वमिति वाच्यं। अन्यथानुपपत्त्याद्दत्तामस्यैव द्रव्यस्य कल्पनात्। अन्यथा जलत्वबाधात् पृथिव्या
पि न द्रव्यांतरं स्यात्। न च विषयसंस्कारकं बाह्यालोकासहकृतचक्षुर्ग्राह्यत्वाद् द्रव्यत्वमेवास्य बाधितमि
ति वाच्यं। तेजस्येव व्यभिचारात्। अन्यथा तु तेजसा न व्यभिचारः तत्राप्यवयविनो ग्रहेऽवयवस्यावयविनोऽव
यवांतरस्य वा विषयसंस्कारकतेजसो विद्यमानत्वात्। न च तेजसत्त्वसरेणुस्थले न चैवं संभवतीति वाच्यं।
तस्य जालस्थसौरालोकसंस्कार्यत्वात्। न च संयोगेन बाह्यालोकस्य संस्कारत्वं संयोगस्यातंत्रत्वात्। तस्मा

मात्र ६

त्वाक्षुषत्वावसानोकार्ये च बाह्यालोकापेक्षेत्याकूतः तन्न। तथाहि। अन्वयव्यतिरेकाभ्यां घटादिचाक्षु
षसाक्षात्कारे बाह्यालोकसंबंधस्य कारणतावगत्यात्। सा च न संबंधिसंबंधेन परंपरासंबंधेऽपि का
र्यानुदयप्रसंगात्। नापि संयोगसमवायसाधारणसाक्षात्संबंधत्वेन तस्य वा निर्वचनात्तु निर्वचनेऽपि
वा तदपेक्षया संयोगत्वस्यैव लघुत्वात्। तथा च संयोगत्वमेव तंत्रं। न च तेजसोऽग्रहो बाह्यालोकसंयो
गापेक्षावच्छेदकमहालोकस्यावयवावयवसंयोगसत्त्वेऽपि तेजस्त्रसरेणुके तदवयवावयवस्यायोग्य

मृ०

त्ल २

यमिदं। तेजोद्रव्यत्वस्यानन्यथासिद्धप्रमाणावधृतत्वात्। न च तमोव्यतिरेकएव तेजआस्तामिति वाच्यं। त-
थासत्यालोक[illegible]स्पर्शेनास्वतरूपाश्रयद्रव्यांतरकल्पनापातात्॥ अन्यथाकस्पारोपस्तेजसि स्यात्। न तमसि
तत्त्वस्यैव नीलरूपादआरोपइति न कल्पना गौरवं। न च तमो नावत्यग्रहान्निय तत तेजोपदेशैव संको-
च्यतामिति वाच्यं। तथा च सति गौरवप्रसंगात्। तत्प्रादि तमोद्रव्यांतरं कल्पनीयं। तत्र रूपवत्त्वे सति निस्प-
र्शत्वं कल्पनीयं उद्भूतनीलरूपवत्त्वे चानुद्भूतस्पर्शवत्त्वं। निःस्पर्शस्य कथमारंभकत्वं। तत्र स्पर्श-
वद्द्रव्यत्वस्य प्रयोजकत्वात्। मूर्त्तत्वापेक्षया लघुत्वात्। आलोक[illegible]नावश्यंगत्वमधिकामवकल्प्य॥

ए

न च पृथिव्यादीनामप्येवमनावश्यापत्तिरिति वाच्यं। तत्र गंधादेरनन्यथासिद्धस्य गुणस्य द्रव्यत्वव्य-
वस्थापकत्वात्। तमस्तु न तथा। न तो गुणत्वपलभ्यते। उपलभ्यमानस्त्वन्यथासिद्ध एव। कथं वा वि-
त्राषग्रणात्वयोग्यतामंगतारणप्रत्यक्षत्वमप्यस्यानावश्यमारोपोपपत्तावन्यानुपस्थितिदृष्टायामु-
पपद्यते। अज्ञावत्वानुपस्थिरस्केति दोषवशादेव समर्थनीया॥ दोषस्तु तथा न तु वस्तुस्वरूपमेवा अ-
द्रष्टादिकमेवावापद्यरागप्रतायां चलनवाबुद्धराश्रयचलनानुविधायितानियमो नास्त्येवंका

स

स्तत्व

जोऽभावत्वे तु कथं गत्यादिप्रत्ययः। अभावत्वेनोपस्थिते तो भावधर्मानारोपात्। अन्यथा तदनुपस्थितेरा-
रोपासंभवात्। न च स्वाभाविकगतेरत्यगत्यनुविधानानुपपत्तिः। आश्रयचलनानुविधानस्य पद्मरा-
गप्रभायामेव दर्शनात्। किंच। तेजोऽत्यंताभावरूपत्वे तमस उत्पन्नव्यवहारो न स्यात्। प्रागभावरूपत्वे-
पि तथा। ध्वंसत्वे तु विनाशित्वं न स्यात्। एवं अन्योन्याभावत्वेपि तथा। अपि चातमसि नीलसाक्षात्कार-
त्वेप स्य त्वांतदनीलं तम इति विपरीतसाक्षात्कारोपि स्यात्। न चायं कदाचिदपि संभवति। प्रत्युत योगि-
नोपि तत्र नीलप्रत्यय एवोत्पद्यते। नीलत्वेनाप्रतीयमानत्वे तस्मिन्तमो व्यवहार एव न भवति। ना-
त्रालोकः। किंत्वंधकार इति व्यवहाराच्च। आलोकाभावातिरिक्त एवांधकार इति पूर्वपक्षसंक्षेपः। १७
॥ ॥अत्रोच्यते॥ यद्यपि भावत्वतान्त्रिकधर्मप्रकारिका प्रतीतिस्तमोविषयानुभवसिद्धा तथापि
तेजोव्यतिरिक्तभावगोचरत्वात् तद्रूपसाक्षात्कारस्य विषयसंस्कारकत्वाद्यालोकापेक्षानियमाव-
धारणबालनन्त्वांतत्वधर्मकल्पनमेव युक्तं तस्याः। न च तेजोव्यतिरेकवत्तमोव्यतिरेकेण विशेषणी-

विद्यमानत्वात्। अत एव दिवा न पश्यंति। तस्य सौरालोकनाभिहतत्वात्। तेषां तु सरूपस्य चक्षुषोर्हि च
नियमात्। नात्रालोकः किंतु नरस्य कार इति स्वव्यवहारस्य नात्र घटः किंतु तदभाव इति वह्नित्वरूपा
दिनासमर्थनीय इति सर्वं समंजसं॥ ॥७४॥ किं तत्कारणत्वं। कार्यनियतपूर्ववृत्तित्वं वा। कार्यनियत
पूर्ववृत्तिजातीयत्वं वा। अनन्यथासिद्धनियतपूर्ववर्त्तित्वं वा। कार्यसहभावे सत्येतदेव वा। सहका
रिविरहप्रयुक्तकार्याभाववत्त्वं वा। अन्यद्वा। नाद्यः। कुलालपितुः कुलालं प्रति कारणत्वप्रसंगात्। आ
काशादेः कार्यमात्रं प्रति कारणताप्रसंगाच्च। किं च पूर्ववृत्तित्वं प्रागभावावच्छिन्नसमयवर्त्तित्वमिति
चेन्न। तथा च तयोरकारणत्वप्रसंगात्। न हि प्रागभावावच्छिन्नसमये प्रागभावो वर्त्तते। स
मयवासमयः॥ किं चैवं घटादिकं प्रति रासभोपि कारणं स्यात्। तस्यापि घटादिनियतपूर्ववर्त्ति
त्वात्। न ह्यनादौ संसारे कस्यापि घटस्य पूर्वं स रासभः पूर्वं न वर्त्तते। अत एव न द्वितीयः। आकाशादे
रकारणत्वप्रसंगाच्च। न ह्याकाशादीनां तज्जातीयत्वेन कारणत्वं। एकव्यक्तिकत्वेन जातेरभावात्॥

तुरपि प

ए

नवार रणत्वशादन्यत्रापि चक्षुस्तालानोपलंभात्। यद्येतमो यदिगतिमत्स्यात् तेजोऽभावविषयत्वाच्चाक्षुषसाक्षात्कारावि
षयो न स्यात्॥ × तमो यदि गतिमतिमत्स्यात् तेजोऽभावविषयकसाक्षात्कारविषयो न स्यात्॥ × तथा यदि त
मस्तेजोभिन्नत्वे सति गतिमत्स्यात्। तेजोऽविषयसाक्षात्कारगतिमत्स्यादित्यत्रतास्पर्शात्। न च प्र
तियोगिग्रहानुपपत्तिः सर्वत्र वस्तुकल्पनात्। तमोमात्रव्यवहारस्य प्रौढप्रकाशकयावत्तेजः
संसर्गाभावनिबंधन एवादोषवत्वात्प्रतियोगिनोऽनवत्वासोऽपि तेजोऽभावावृत्तासाविरोधमतः। अत्
६ त्व वैयदेहिषिप्रतियोगिग्रहोपपत्तेणात्। तत्तराशिष्विवकिरीवसमुं[illegible]दायिव्यतिरेकप्रयुक्त एव विनाचा
प्रत्ययः। एवमुत्पत्तिप्रत्ययोऽप्युक्तः। नीलरूपारोपविशिष्टस्तेजःसंसर्गाभावस्तम इति केचित्। अत्र
चाक्षुषप्रत्ययः कथमिति चिंत्यं। यत्तु नरुक्तं नीलं तम इति भ्रांतत्वेपि अनीलं तम इति प्रतीतिः। कदाचि
दपि कस्यापि स्यादिति तन्मंदं रारोपे प्रत्ययवत्वानुपपत्तेः। अत एव योगिनापि तथा प्रत्यय एवो
न्नीयत इति निरस्तं। पवकादीनां बाह्यालोकनिरपेक्षं चक्षुर्ग्राहकमित्यसिद्धमेवा। नत्र तेजोंतरस्य

प्रत्यवस्पर

विषय -

म०

दवस्थकर्म्मादिकारणत्वव्यावृत्त्यर्थं सहजाभावो विशेषणमिति वाच्यं तत्रापि स्वरूपयोग्यताकारणत्व
स्येष्टत्वात्। कार्याभाववत्त्वस्य सहकारिविरहात्। किंच। कार्यसहभूतत्वे सत्यनन्यथासिद्धनियतपूर्व
वृत्तिजातीयत्वं तथापि वाच्यं। ननु प्रतिव्यक्ति कार्यसहजाभावः। अन्यथा कारणत्वानिश्चयेन प्रवृत्ति
कापि न स्यात्। सहजाभावस्य कार्यासत्तेः पूर्वं निरूपयितुं अशक्यत्वात्। तज्जातीयत्वं तु विनश्य
दवस्थसाधारणमिति कथं सहजाभावेनापि विशेषणं न तच्च व्यवच्छेद्यं। नापि प्रथमः सहकारिस्व
निवेशे आत्माश्रयप्रसंगात्। सहकारिपदेन तदन्यविवक्षायां विरहपदेन संसर्गाविवक्षा
यां च तदितरसंसर्गाभावप्रयुक्तकार्याभाववत्त्वमित्यर्थः स्यात्। तत्र किं प्रयुक्तत्वं। जन्यत्वं वा
व्याप्यत्वं वा। व्यापकत्वं वा। एवं तावत्कार्याभावोपि। प्रागभावो वा अत्यंताभावो वा प्रध्वंसो वा
संसर्गाभावप्रयुक्तत्वेन रूपेण त्रितयमपि वा। न तावदाद्यः। प्रागभावात्यंताभावयोरजन्यत्वात्।
प्रध्वंसस्यापि दंडविरहाजन्यत्वात्। संसर्गाभावत्वे त्रितयसाधारणे तावद्दूषणं। नापि

भाव६

१०

भा२

८४६

न च जातित्वस्योपलक्षणं। उपाधेरपि तदवच्छेदकस्याभावात्। न घटाकाशादिकारणत्वं केनाप्यवच्छिद्यते।
नापि तृतीयः। अनन्यथासिद्धत्वं हि अनन्यथासिद्धिर्हि विरहः। अनन्यथासिद्धिश्च प्रकारांतरेणोपपत्तिर्हि
त्रिविधा। अन्यत्वं च कार्यापेक्षया। अन्यापेक्षया वा। न तावदाद्यः। दंडादेरकारणत्वप्रसंगात्। न हि घ
टादिनिष्ठप्रकारांतरेण दंडादेर्नोपपत्तिः। नित्यस्य कार्यमात्रे कारणत्वप्रसंगाच्च। एवं द्वितीयपक्षो
ऽपि निरस्तः। न द्वितीयः। यत्किंचिदपेक्षया प्रकारांतरेणोपपत्तिर्द्वयोः सर्वसाधारणात्। अ
नन्यथासिद्धस्य निर्वचनानवकाशोऽपि। ननु निर्वचनेन्तु अनन्यथासिद्धत्वं नियतपूर्ववृत्तित्वेन तल्लेत
द्विशेषणवैयर्थ्यात्। न च कुंभकारपितुः कारणत्वव्युदासार्थं सहभावो विशेषणमिति
वाच्यं। अनन्यथासिद्धेव तन्निरासात्। कथमन्यथासिद्धत्वमपि न कपालरूपादेः कारणत्वं
कथं कार्यासहभावस्तस्य घटादेः कारणत्वे। न च व्यापारद्वारा तस्य सहभावः इति वाच्यं बाधनात्॥
न च सहभावानिरूपकत्वमेव सहभावेतत्वं। एतदंतर्भावेन कारणपदार्थत्वे व्यापारांशग्रहणं दंडा
पां कारणव्यवहारोच्छेदप्रसंगात्। न चैवि नरस्य

प्युचान्ति रिति गौतममतत्त्ववेदिनः। तत्रैवं विप्रतिपन्नितः स शंग्यग वादिपद निरूपितत्वा क्यत्वं नाति ८

२१० मू०

रणं॥ विशिष्टं तु अन्यथैनैथासिद्धेतरत्वे वेवर्त्तित्वानुपत्नी। वि घटत्वं त्वेवं निरूपितनियतसमर्थवैनप्रति
योगिजातीयत्वं तत्राक्रान्तव्यथासिद्धत्वं च यत्कार्यं प्रतिप्रसनियतान्वयव्यतिरेकोत दुक्तेपत्नीवेन
न यस्यान्वयव्यतिरेको तदवच्छिन्नान्वयव्यतिरेकप्रतियोगित्वं। प्रागभावत्वं च गंधानाधारस
मवानाधारानावत्वादिकं मन्यत्वस्यापद्मासहकारिविरहप्रयुक्तमेवं कार्याभाववत्त्वमेव कार
णत्वं। अस्यार्थः। इतरव्यतिरेकावच्छिन्नकार्यानुत्पादव्याप्यत्वं। अनुत्पादश्चात्यन्तावच्छिन्न
ना६ प्रतियोगिको [illegible] त्यंभावः। सचोत्पत्तिघट्यत्वे त्तिविरोधिप्रत्यासत्तिको ऽतो नातिप्रसंगः। एवं सह स६
प्रयुक्त१ कारिविरहप्रयुक्तत्वादिरूपेण गणनेव कारणं॥ ॥अथाग्रवादिपदानां जातानां वचनाक्तिरितिनोत
तिताः। व्यक्त्या कृतिजातिस्मात्रवृत्तिर्न वा। जातिवा चपैकदेशवाच्यत्वं जातिव्यतिरिक्तवृत्तिर्न वा॥ ११
अविधेयत्वं नित्यप्रकारसमात्रवृत्तिर्न वा। इत्यपि कश्चिदाचष्टे तो तातिताना ममाराय। वाक्या
र्थप्रातिपत्त्यनुकूलपदार्थस्मरणजनकः पदार्थयोः संबंधस्तावद्वाच्यकत्वं नाम सकलवादि

वि २४

द्वितीयः। यावत्तदितरसमवहितेऽपि तत्र तत्र शिलाशकलादौ विकल्पितकार्याभावस्य दर्शनात्।
सहकारिविरहव्यतिरेकेण कार्याभावस्यासंभवात् अव्यापकत्वात्। नापि तृतीयः प्रागभावस्य तदि-
तरविरहव्यापकत्वाभावात्। तदितरविरहिणि शिलाशकलादौ प्रागभावाभावात्। एवं अत्यन्ता-
भावोऽपि न तदितरविरहव्यापकः। तदितरविरहिण्यंकुरप्रागभाववति बीजे तदत्यन्ताभावाभावात्।
एवं तादृशात्यन्ताभावस्य शिलाशकलादावपि विद्यमानत्वे नातिव्यापकत्वात्। एवं प्रध्वंसेऽपि।
सर्गोत्तरावच्छिन्नायां मत्यन्ताभावमादाय शिलाशकलादावतिप्रसक्तेः। तदवस्थैव। अथैवं तद-
नुरोधेनैवान्योन्याभावविशेषस्य कारणत्वमिति कल्पनीयमिति चेन्न प्रतियोगिकस्यान्योन्याभाव-
स्य तत्त्वायोगात्। अतिरिक्तान्योन्याभावकल्पने तत्प्रतियोगिनोऽपि अतिरिक्तस्य कल्पनापातात्। ता-

ग २

केनामान्तरकरणे प्रसंगाद्वेति॥ ॥छ॥ ॥अत्रोच्यते॥ कार्यनियतप्राक्तनीयत्वं कारणत्वं। न चाका- पूर्ववति
शादेरपि कार्यमात्रं प्रति कारणत्वं सामान्यतः पूर्ववृत्तित्वात्। न स्वाकाशादिकं न किंचिदपि प्रतिका-

त्रमाहेन्द्रव्यं। तथा च व्यक्तिविशेषलाभः कथं। जातिविशेषप्रतिसंधानाद्व्यक्तिविशेषलाभ इति यद्य
भ्युपगतं। तदा जातौ विशेषो व्यक्तिरेवा तस्याश्च ज्ञानं जातिज्ञानेनैव संभवेति किंकेनाक्षेप्तव्यमेव वा।
किंचिद्धि वस्तुस्वतएव विलक्षणमिति न्यायेन ज्ञातः स्वतएव विलक्षणत्वात्। अन्यथान्यान्या
श्रया ऽनवस्थाप्रसंगात् व्यक्तेः प्राधान्यानुजवालक्षणा व्यक्तौ। आदेपत्रु पर्द्दै न तास्यादिति
नाहैकदेशिनस्तदाकुः गेजातावस्तित्व नास्तित्वे न हि किंचिद्धि वहति। नियलाल्लक्षणीयापाव्य
क्तेस्तल्लिविशेषण इति। विशिष्टगोचरा एके वदन्ति किंतु जातिनिष्ठतयाज्ञातापयुज्यता व्यक्तौ
त्वसास्वरूपसती। समानसंवित्संवेद्यतया व्यक्तेरपिज्ञानमिति गुरुमततत्त्ववेदिनः। व्यक्तेर
त्वयप्रकारतया ज्ञानमिति गुरुमतैकदेशिनः। अनुमानं त्वत्र गोव्यक्त्याकृतीमत्रगोशब्दवा
च्यगोत्ववन्निमित्वात् घटवदिति॥ ॥अत्रोच्यते॥ ॥गामानयेतिवाक्यश्रवणानंतरं प्रयोज्यवृद्ध
स्य गवानयने प्रवृत्तिर्दृश्यते तावद्वा स्तागवानयनज्ञानसाध्या। तच्च ज्ञानं गामानयेतिवाक्यज

सिद्धं। तत्संकेतो वा पदार्थांतरं वेति। अन्यदेतत्। स च संबंधः कुत्र कल्प्यतां। जातिमात्रे वा जातिव्य
क्त्योर्वेति विमर्शे जायमाने जातावेव तत्कल्पनाऽप्यायसीनां गृहीतविशेषणान्यायेन न तु व्यक्तौ।
अनंतत्वात्। संबंधग्रहस्याशक्यत्वात्। सामान्यलक्षणायाः प्रत्यासत्तेः प्रमाणाभावेनानंगी
कारात्। तथात्वे वा व्यक्तेरन्यथालाभसंभवे न तत्र शक्तिकल्पनस्य गौरवपराहतत्वात्। तदि
दमुक्तं। विशेष्यं नाभिधा गच्छेत्क्षीणशक्तिर्विशेषणे इति। व्यक्तेः कथं लाभ इति चेत्। आक्षेपात्।
ननु व्यक्तिं विना किमनुपपन्नं। न तावज्जातिः व्यक्तिं विनापि जातेः स्वरूपावस्थानादिति। मैवं जाते
र्व्यक्तिवृत्तिता नियतेति कथमाक्षेपानुपपत्तिः। न च जातिव्यक्त्योर्युगपत्स्फूर्तीति दर्शनादाक्षे
प्याक्षेपकभावानुपपत्तिरिति वाच्यं। गौरवप्रसंगबाधकबलेन युगपत्स्फूर्तौ तत्र कल्पन
स्योचितत्वात्। न च जातिज्ञानसामग्री व्यक्तिज्ञानसामग्री नियतेति तदेव व्यक्तेर्ज्ञाने नियमात् कथ
माक्षेप इति वाच्यं। जातिसाक्षात्कारे स्वयं नियमो न तु तत्स्मरणेपि। ननु जातिमात्रज्ञाने व्यक्तिस्मा

समानसंवित्संवेद्यतयाकथमाक्षेपः। नचान्वयप्रकारकतयाव्यक्तेर्लीनमपित्त्रप्राधान्येनकिंचपदार्थोप
स्थितावन्वयबोधप्रकारतास्यात्। व्यक्त्याविनाकुजात्युपस्थितिरेवनास्तीतिकस्यान्वयेव्यक्तिःप्रकारःस्या
त्। समानसंवित्संवेद्यतानियमेपिजातौशक्तिर्नव्यक्तावितिचेत्। नशक्तिर्हिसामर्थ्यं। तच्चकार्योप
लेयंकार्यंचात्रज्ञानात्मकामवेतिकुगोरवं। नचजातिविषयतयाज्ञानंकार्यंनतुव्यक्तिविषयतयेतिवा
च्यं। अन्वयविषयकंज्ञानंपदजन्यमित्यस्येवतदर्थत्वात्। किंवास्मिन्नयेपदानांशक्तिःसंकेतोनतु
पदार्थोत्तरं। सचव्यवहारबलेनजातिवद्व्यक्तावपिगृह्यते। नहुगोपदाज्जातिमात्रंव्यवह्रियतेन
तुव्यक्तिरितियुक्तिमत्। नतस्मात्संकेतग्राहकस्यजातिव्यक्तिसाधारणस्यप्रमाणस्यसिद्धत्वाल्लुजयत्रापिसं
केतरूपाशक्तिरितिनकिंचिदनुपपन्नं। एतेनगुरूणामहुंडरतीनिरस्ता। स्वरूपसत्याःशक्तेःपदार्था
पस्थित्यनंगत्वात्। तदर्थमेवतस्याःकल्पनात्। अन्यथाज्ञातावपिस्वरूपसत्त्वेनवास्तामितिर्धावाल
वचसोऽकारणप्रसंगात्। तस्माज्जातिवद्व्यक्तिरपियथासंभवमाकृतिरपिपदार्थइतिनिर्दुष्टंयत्सू
त्रितमहर्षिणाव्यक्त्याकृतिजातयःपदार्थइतितादवयुक्तमितिसर्वंसमंजसमिति॥ ॥४॥ अथशक्तिः॥

व२
पा१

१३
अस्या ॥

रा०

मू०

।।।१ ना२

प्यत्वात् । तावत्त्वस्य च तावन्निवृत्त्याकारत्वस्यापि निवृत्तेः । किं च न प्रतिबंधकाभावत्वेन कारणत्वं अन्यो
न्याश्रयप्रसंगात् । प्रतिबंधकत्वं हि कारणीभूताभावप्रतियोगित्वं तच्च कारणत्वग्रहाधीनग्रहं । कार
णत्वं च तद्ग्रहाधीनग्रहमिति । नापि प्रत्येकतावत्त्वेन मणिसमवधानेपि तन्मोदेन्यातावद्रूपमस्ता
वमादाय दाहप्रसंगात् । नापि मणिप्रागभावत्वेन उत्पन्नविनष्टमणौ दाहानुत्पादप्रसंगात् । नापि म
णिध्वंसत्वेन अनुत्पन्नमणौ दाहानुत्पादप्रसंगात् । नापि मण्यत्यंताभावत्वेन उत्पन्नविनष्टमणौ अत्यं
ताभावस्य तदाभावात् । नापि मण्यादिसंसर्गाभावत्वेन । अन्योन्याभावातिरिक्तस्य संसर्गाभाव
स्य निर्वक्तुमशक्यत्वात् । तथा हि किं तत्संसर्गाभावत्वं । संसर्गप्रतियोगिकाभावत्वं वा । तादात्म्याति
रिक्तप्रतियोगिकाभावत्वं वा अन्यद्वा । नाद्यः । संसर्गेऽन्योन्याभावेति व्यापकत्वात् । न द्वितीयः । तादा
त्म्यात्यन्ताभावेऽव्यापकत्वात् । किं च मण्यभावस्य कारणत्वे मणेः प्रतिबंधकत्वं न स्यात् । प्रतिबंध
कत्वं हि किंचित्कार्यानुकूलविघटकत्वं । न च मणिः किंचिदनुकूलं विघटयति । स्वतए वानुकूलवि

(नात्यः ।। आसंतवात् २

९४

२८०

म०

अत्यंताभावस्यसदातनत्वात्। उत्तेजकापनयेपि दाहप्रसंगात्। किंच। मण्यादिसंसर्गाभावस्यसंस
र्गाभावत्वेनकारणत्वम्। तथा च तत्र समवधानेपि यत्किंचिन्मणिसंसर्गाभावमादाय दाहप्रसंगात्।
नद्धीतरसमवहितेदंडसमवधानेदंडान्तरविलंबेनकार्यविलंबोदृश्यते। किंच प्रहरं मा दहेत्या
दौ मंत्रस्य प्रतिबंधकत्वं वाच्यं। तथा च तदभावस्य कारणत्वे प्रहरात्परत एव दाहः स्यात्। मंत्रस्य
शब्दस्य रूपतया अक्षतरविनाशित्वात्। किंच तार्णादौ वह्निप्रयोजकं तृणत्वादिकं व्यभिचारात् राक्ष
न्यस्यानुगतस्याभावात्। तृणादीनामेकशक्तिमत्त्वं प्रयोजकं वह्निचेत्स्वीकर्तव्यं। किंच पिपासोपश
मनसमर्थमिदं जलं जलत्वादित्यत्र सामर्थ्यं तावदनुमीयते। तत्तावन्न पिपासोपशमनकारणत्वं।
तद्धि पिपासोपशमनस्वरूपयोग्यता वा सहकारियोग्यता वा। नाद्यः स्वरूपयोग्यत्वस्य तत्त्वहे
णैव ग्रहणात्। न द्वितीयः व्यभिचारात्। न हि सर्वं जलं पिपासोपशमनसहकारियोग्यं भवतीति नि
यमः। तस्मात्कारणत्वातिरिक्तमेव सामर्थ्यमनुमीयात्। तादृक्च शक्तिः एवं व्यवस्थितेऽनुमानमप्य
स्यात्। अयं वह्निर्दाहानुकूलातीन्द्रियैकधर्मसमवायी। दाहकारणत्वात्। आत्मवत्। न्यात्मत्व

परस्परं

लातरव

१५

व्यतिवा

वे तथात्वे तत्संयोगाभावात् । न चैतदेष्टाद्रूपसाक्षात्कारस्य तथात्वेन तमालोकसंबंधव्यतिरेकात् । क्वचिद
पि व्यतिरेकसिद्धिरित्याद्यत्रैव । प्रमाणबलात्तेजोव्यतिरिक्तत्वेन विशेषणीयमिति यदि तदा तमोव्यति
रेकेणापि प्रमाणबलादेव विशिष्यतां । प्रत्यक्षत एतस्याबाह्यालोकव्यतिरेकसहकृतचक्षुर्योग्यत्वा
व धारणावशान्न पृथिव्यादेर्बाह्यालोकसापेक्षत्वस्तु श्रावणप्रत्यक्षावर्तत्वं कल्प्यतां । इंद्रियांतरमेव वा त
मोग्राहकमस्तु । अत एव तामससादिंद्रियादंधतमसे पिपीलिकादीनां तद्ग्रहः । स्यादेतत् । तमः किं
नित्यमनित्यं वा । आद्ये रूपवतो नित्यस्याणोः रूपत्वप्रसंगात् । द्वितीये त्वारब्धत्वं स्यात् । न च निरवय
वद्रव्यस्यारंभकत्वं । द्रव्यसमवायिकारणतायां स्पर्शवद्द्रव्यत्वस्य प्रयोजकत्वात् । न च महत्त्वमेव तत्र
प्रयोजकं । मनसोप्यारंभकत्वप्रसंगादिति । एतदपि न । रूपवत्त्वे नित्यत्वेपि च्छेदेष्टाणुरूपत्वस्वीकारात् । त्र्यणुकम
नसि महत्त्वानंगीकारात् । अनुद्भूतस्पर्शएव वा कल्प्यतां । न चोद्भूतनीलरूपस्योद्भूतस्पर्शसामानाधिक
रण्यनियमः । पृथिव्यामेव तथात्वात् । एवं सानुद्भूतोपि कल्प्यतां । तेजोवत्तमोरसत्वमवांगीक्रियतां । त

१

न्यमानरूपातिरिक्तमेव पृथिव्यां जलस्य वा रूपं। एकत्रैकदा रूपद्वयासमावेशात्। आलोकं विना तद्रूपग्राह्य
षत्वाविरोधात्। तज्ज्ञातावग्रहे तेनोपलब्ध्याविरोधे न परिहृतत्वात्। नापि कर्मैव चलनात्मकत्वापत्तेरुपलभ्य
मानत्वात्। अंधकारे वर्तिगतदीपचलनातिरिक्तस्य तदसंगत्वात्। नापि द्रव्यं पृथिव्यादिबहिर्भूतत्वात्। ननु
नीलरूपवत्त्वेन पृथिव्यामेवासावंतर्भवतु। उद्भूतरूपस्य पार्थिवस्योद्भूतस्पर्शवत्त्वनियमो
सिद्ध एव। इंद्रनीलप्रभासहचरनीलभागे न व्यभिचारात्। तदीयस्पर्शस्यायोग्यत्वेपि नीलरूपस्य यो
ग्यत्वात्। न चोद्भूतस्पर्शेंद्रनीलमणिरूपमेव प्रभायामारोप्यते इति युक्तं। इंद्रनीलग्रहव्यतिरेकेपि
तत्प्रभायां नीलप्रत्यक्षस्य दर्शनादिति मैवं। एवं तत्त्वस्योदाहरणस्यासिद्धेः। सिद्धावपि इंद्रनीलस्य वा
न्यस्य वा समवेमाणस्यैव रूपस्यारोपेणान्यथासिद्धेः। तत्सहचरतया तथा प्रतीतनीलभागाकल्पनात्।
न च ज्ञालांतर्गतमरीचिस्थोद्भूतरूपस्य स्पर्शपार्थिवेन व्यभिचारः स्पर्शपाटनानंतरमुपलभ्यमानज्ञाल
मरीचिस्थसूक्ष्मभागवत्तस्याप्युद्भूतस्पर्शवत्त्वानुमानात्। तर्हि त्रसरेणुस्पर्शः किमिति नोपलभ्य

म

धितस्य द्रव्यत्वमितिवाच्यं। अन्यथानुपपत्त्याद्द्रामस्यैव द्रव्यस्य कल्पनात्। अन्यथा जलत्वबाधात्पृथिव्य
पि नद्रव्यांतरं स्यात्। न च विषयसंस्कारकबाह्यालोकासहकृतचक्षुर्ग्राह्यत्वं द्रव्यत्वमेवास्य बाधितमि
तिवाच्यं। तेजस्येव व्यभिचारात्। अन्येषु तेजसा न व्यभिचारः तत्राप्यवयविनो ग्रहेऽवयवस्यावयविनोऽव
यवांतरस्य वा विषयसंस्कारकतेजसो विद्यमानत्वात्। न च तेजःसु च सरेणुस्थले न चैवं संभवतीति वाच्यं।
तस्य ज्वालस्थसौरालोकसंस्कार्यत्वात्। न च संयोगेन बाह्यालोकस्य संस्कारत्वे संयोगस्यातंत्रत्वात्। तस्मा

मात्र६ च्चाक्षुषमात्रसाक्षात्कारे च बाह्यालोकापेक्षेत्याकूतं। तथाहि। अन्वयव्यतिरेकाभ्यां घटादिचाक्षु
षसाक्षात्कारे बाह्यालोकसंबंधस्य कारणता गम्यते। सा च न संबंधिसंबंधेन परंपरासंबंधेऽपि का
र्येन्द्रियप्रसंगात्। नापि संयोगसमवायसाधारणो साक्षात्संबंधत्वेन तस्य वा निर्वक्तुं निर्वचनेऽपि
वा तदपेक्षया संयोगत्वस्यैव लघुत्वात्। तथा च संयोगत्वमेव तंत्रं। न च तेजोग्रहे बाह्यालोकसंयो
गापेक्षा वक्तव्या। महालोकस्यावयवावयवसंयोगसंत्वेऽपि तेजश्चक्षुरणुके तदवयवावयवस्यायोग्य

५०

तमहत्त्वसमानाधिकरणोद्भूतस्पर्शयोग्यत्वादिति चेत्। गृह्यत एव विविच्य न गृह्यते। सूक्ष्मत्वादिति चेत्
त्वः। अनेन रूपेण स्पर्शयोग्यते व नास्ति किं तु महत्त्वैर्विशेषसामानाधिकरण्येन। सर्वविशेषाः कार्यैको
न्नेयः। अत एव त्रसरेणुस्पर्शस्यायोग्यत्वात्। त्रसरेणुर्न स्पार्शन इति केचित्। जलादित्रिकव्यतिरिक्तस्तु

स्पर्शो

स्फुट एव। न च तेजोविशेषस्तमः स्वर्णादितेजसा सहविरोधात्। तद्विरोधे तेजोन्तरमेवेदमिति चेन्न
न। सत्रतेषु रत्नादिषु छायारूपं तमो न स्यात्। रत्नादिप्रतापासहविरोधात्। अनतिस्फुतया तया
सहविरोधः। ससावातिस्फुटेति चेन्न। पृथिव्यादिनातजसोऽनतिवर्तनेन। तेजोन्तरस्यानिरावकस्या
नुपलंभात्। न च छायायेन दृति तवा। बहुत्वतमतमसितदयदप्रसंगात्। न च तेजोन्तरमवानिरा

६

वरकं तस्यानुपलंभात्। तेजोभित्तावकस्य छायापातित्वावकव्यापाताच्च। नापि विलयं तु चक्षुरव्याप
कत्वादनित्यत्वाच्च। न मनः प्रकृत्यत्वात्। तस्माद्भावद्विशेषबाधस्फुटाभावत्वमस्य बाधितमिति। मैवं।
रूपवत्त्वपरिमाणत्वक्रियावत्त्वादिना द्रव्यत्वस्यैवोचितत्वात्। न च पृथिव्यादिनवकान्तर्भावो

ना।४

घटत्वेन रूपत्वात्। किंच प्रतिबंधकसद्भावे उत्तेजकस्य समवधाने दाहदर्शनात्र कथं व्यभिचारात्प्रतिबंधका
भावस्य कारणत्वं। न चोत्तेजकसद्भावे न प्रतिबंधकसद्भावः उत्तेजकाभावविशिष्टप्रतिबंधकाभाव
स्तर्हि कारणं विशिष्टं च विशेष्यतत्संबंधातिरिक्तं नास्ति। तथा च विशेषणविशेष्यतत्संबंधाभावाः प्र
त्येकं कारणं मिलिता वा नाद्यः प्रत्येकं व्यभिचारात्। न द्वितीयः। अभावमेलनाभावेऽपि दाहदर्शनात्। न च
विशिष्टाभावोऽतिरिक्त एवेति वाच्यं। विशिष्टस्यापि विशेषणाद्यनतिरेके विशिष्टाभावस्य विशेषणा
द्यभावातिरेके का प्रत्याशा। न च विशिष्टमतिरिक्तमेव प्रतिकरणीयं किं विशेषणावच्छेदकत्वेन दृग
नंगप्रसंगात्। प्रत्यभिज्ञानं च न क्वचिदपि स्यात्। विशेषणादिनैव विशिष्टव्यवहारोपपत्त्या वति
रिक्तकल्पनायोगाच्च। किंच मण्यादिसमवधानदशायामुत्तेजकसद्भावे यदा दाहो जायते तदा किं प्रति
बंधकप्रागभावात् उत प्रतिबंधकध्वंसात्। न तदत्यन्ताभावात्। न तावदाद्यो सिद्धः प्रागभावस्य कार्यै
कानेयत्वात्। न द्वितीयः उत्तेजकापनयेऽपि दाहप्रसंगात् ध्वंसस्य विद्यमानत्वात्। अत एव न तृतीयः।

का।४

त्वयोर्व्यावर्त्तकयोर्विद्यमानत्वात्। न च संसर्गावच्छिन्नप्रतियोगिकाभावत्वमन्योन्याभावविशेषेतिप्रस
क्तं। तथा हि गृहे दृष्टतत्कुघटमध्यादेकस्मिन्दिने आनीतघटे ऽधुना गृहे संसर्गिघटभिन्नो ऽयं घट
इति व्यवहारोऽस्ति। न च तत्र घटत्वस्यान्योन्याभावस्य प्रतियोगितावच्छेदकं घटत्वं। घटत्वस्य तत्राप्यनु
योगिनि वृत्तेः। तस्मादवश्यं तदन्योन्याभावस्य संसर्गः प्रतियोगितावच्छेदक इति स्वीकर्त्तव्यमिति वा
च्यं। अभावस्थले निरसनीयत्वात्। न च प्रतियोग्यवृत्तिसदातनाभावत्वं घटपटोनायं घट इति व्या
सज्यवृत्तिप्रतियोगिकान्योन्याभावव्यापकमिदमिति वाच्यं। तस्याप्यभावस्थले निरसनीयत्वात्। न वा अभा
वकारणत्वे मणेरकिंचित्करत्वेन प्रतिबंधकत्वानुपपत्तिः। मणेः प्रतिबंधकत्वाभावात्। किंतु मण्या
दिकमेव सामग्रीविघटनं। तस्य योक्ता च पुरुषः प्रतिबंधकः। न च विशिष्टस्याव्यतिरेके तदभावव्य
तिरेकानुपपत्तिः। प्रतियोगिभेदेनैवावच्छेदकभेदेनाप्यभावभेदस्वीकारात्। भवति हि केवलदंड
सद्भावे केवलपुरुषसद्भावे तदुभयाभावे च दंडी पुरुषो नास्तीति व्यवहारः। विशिष्टाभावस्यातिरेके

न्नुपाधिः। तेजोद्व्यणुकएव साध्याव्यापकत्वात्। तत्रापि दिवादावनुकूलस्यातीन्द्रियस्य स्पर्शस्य विद्यमा
नत्वात्। न वा सोनदाहाद्दतुः ३ उष्णत्वोद्भूतस्पर्शमात्रस्यैव तत्त्वात्। यद्वा करतलानलसंयोगः। कार्यानुकू
लातीन्द्रियधर्मसमवायी। कारणत्वात्। आत्मवत्। अत्रात्मत्वोपाधेः साध्याव्यापकत्वं स्फुटमेव।
न च द्रव्यत्वमुपाधिः। धर्माधर्मान्यो साध्याव्यापकत्वात्। अत्र धर्मत्वादेरेव तथात्वात्। तस्य विद्यमा
नत्वात्। नं तीन्द्रियप्रतियोगिकसादृश्य न सिद्धसाधनं। सादृश्यपदार्थस्याभावान्तरत्वे नासमवेत
त्वात्। अयं वह्निः कार्यानुकूलातीन्द्रियैकधर्मसमवायी। कारणत्वादात्मवदिति वा। एवं चात्मवृत्ति
वीर्येतौ अन्यथानुपपत्त्याद्दिशक्तिः कल्पनीया। न चात्र सा। प्रतिबन्धकाभावेनोपपत्तेः। न चाऽन्यो
न्याभावमादायातिप्रसंगः। प्रागभावत्वादिनानुगमो वा। संसर्गाभावत्वेन तयोर्निरासात्। न चान्यो
न्याश्रयः। मण्यादिसंसर्गाभावत्वेनोपस्थितकारणत्वग्रहस्य सत्करत्वात्। न चान्योन्याभावे संस
र्गाभावयोरन्तेदः। आपाततः संसर्गावच्छिन्नप्रतियोगिकाभावत्वप्रतियोग्यवृत्तिसदातनाभाव

चा०५

२०

म०

मानं च कचिदपि न स्यात्। तज्जातीयशक्तिमतोऽन्यस्मादपि कार्योत्पत्तिसंभवानामाजागरूकत्वात्। तथापि
तृणादीनां वह्निं प्रति कथं कारणत्वग्रहः तेषां दहनमात्रं प्रति व्यभिचारात्। दहनावान्तरविशेषं कार स्पष्ट
णताग्रहो त्वरकल्पत्वात्। न चान्यतमत्वेन नियामकं विशकलितसमवधानेऽपि कार्यप्रसंगात्। व्यक्तिवि
शेषान्वयव्यतिरेकयोरासत्त्वादिसाधारणत्वादिति। मैवं तुल्यत्वात्तवापि दिने का क्लिमत्वेन कारण
त्वं गृह्यते। किंतु कारणत्वग्रहानन्तरं शक्तिकल्पनं प्रयुक्तं। अन्यथा रासभस्यापि वह्निशक्तिकल्पना
स्वीकारात्। तथापि यदि स्वहद्भावेन प्रच्छलितदाव्यते। यज्जातीयमलकात्तृणसमवधाने कार्यं जाय न६
ते। तज्जातीयमलकादेवतृणसमवधाने जायते इत्येवंरूपान्वयव्यतिरेकाभ्यामेव तदवधारणात्।
नवैतद्रासभादिसाधारणं। तृणसवं मेहितेऽपि तस्मिन्नलके रासभादिसमवधानेऽपि कार्यानुत्प १७
दात्। दंडव्यतिरेकेणापि पटोत्पत्तिदर्शनवत्तृणव्यतिरेकेणापि दहनोत्पत्तिदर्शनात्। कथं तृणका
रणताग्रह इति चेत्। न एवंभूतव्यभिचारग्रहस्य पूर्वोक्तान्वयव्यतिरेकापरिपंथित्वात्। प्रत्युत

पिकतमोसाविति चेत् । तदनुपपन्नं सेप्यन्ते ॥ अविनिर्बंधकरणेतु अत्यंताभाव इति गृहाण । न चात्यंताभा
भावस्य सदातनत्वात् । उत्तेजकापनये पि दाहप्रसंग इति वाच्यं । विशेषणाद्यन्यतमाभावस्य विशिष्टा
भावप्रत्यासत्तिवेनेष्टत्वात् । यद्वा विशेषणाद्यभावेनैव विशिष्टाभावव्यवहारोपपत्तौ नातिरिक्तवि
शिष्टाभावकल्पनं । नचानुगमाभावः । विशिष्टविरोधित्वाभावत्वेनैवानुगमात् । नचकिंचित्प्रतिबंधकसं
ज्ञावे प्रतिबंधकानां तावदभावमादाय दाहोत्पत्तिरिति । प्रतिबंधकजातीयासमानाधिकरणप्रतिबंधक
संसर्गाभावस्य कारणत्वात् । तथैवान्वयव्यतिरेकाभ्यामवधारणात् । परेणापि शक्तिं प्रति प्रतिबं
धकाभावहेतुताया व्यवस्थाप्यत्वात् प्रदहरमाहरमा दहेत्यादौ तथा ज्ञाताभिप्रायविषयसमयस्येव
प्रतिबंधकत्वं तथा च नातिप्रसंगः । नच तासीदावेकजातीयप्रयोजकतया शक्तिस्वीकार इति शक्तिं विनापि
पवनादिकारणादेवोपपत्तेः शक्तिवादिनापि विजातीयानां कारणानामेकजातीयशक्तिमत्त्वस्यावश्या
व १ भ्युपगंतव्यत्वात् । अन्यथा कार्यकारणविशेषानुमानं कारणविशेषाभावात् कार्यविशेषाभावानु

तथाहि व्रीहीन् प्रोक्षतीत्यादौ व्रीह्यादीनां प्रोक्षणादिकर्मता प्रतीयते। सा च तत्फलाधारत्वव्यतिरेकेणा
नुपपद्यमाना व्रीह्यादेस्तत्फलाधारतामवगमयति कथमन्यथा प्रोक्षितस्य च व्रीहेरुत्तरत्रोपयोगः
प्रोक्षणस्य विरुद्धस्वत्वात्। न च प्रोक्षणमुपलक्षणं ध्वंसस्यापूर्वस्य वा योगादावपि तथात्वप्रसंगा
त्। प्रोक्षणस्य पुरुषसमवेतसंस्कारजनकत्वेन व्रीहिकर्मत्वानुपपत्तेरुक्तत्वात्। न च संस्कारेण
परंपरासंबंधात् कर्मतोपपत्तिः साक्षात्संबंधमबाधे परंपरासंबंधस्य कल्पनानर्हत्वात्। अति प्रसं
गाच्च। किंच कामिनीचरणघातेऽशोकोदयदर्शनादाघातजन्यातिशयाश्रयत्वमशोकस्य कल्पनी
यं। तथा कांस्यादौ तस्मादिप्रयोगेनावश्यमतिशयाश्रयत्वं स्वीकर्तव्यं। अन्यथा तत्र शुद्धिपदार्थस्य
निर्वक्तुमशक्यत्वात्। एवं प्रतिमादावपि प्रतिष्ठादिप्रयोज्यमतिशयाधारत्वमस्त्येव। किंच कलमबी
जादेरापरमाण्वंतं गात्यरमावृष्टवांत्तरजातेरनावा कथमतिशयमंतरेण तेभ्यः कार्यविशेषो
जायत इति॥ ॥अत्रोच्यते॥ ॥प्रोक्षणजन्यसंयोगरूपफलशालित्वेनैव व्रीहिकर्मतोपपत्तौ न

तथाऽन्वयव्यतिरेकग्रहस्तत्र तथा व्याप्तिवारस्य विरोधित्वात्। अन्यथा वह्न्यर्थिनां तृणादिषु
निःशंकं प्रवृत्त्युपपत्तेः। यद्वा प्रदीपादिष्ववान्तरजातिभेदस्य प्रत्यक्षसिद्धत्वात्। विशेषेणा
न्वयव्यतिरेकाभ्यां कारणत्वग्रह इति न किंचिदनुपपन्नं॥ पिपासोपशमनसमर्थमिदं जलं जल
त्वादित्यादौ सहकारिविरहप्रयुक्तायोग्यत्वमेवानुमेयं तथा चैतदनुरोधेनापि शंकानोक्तिसिद्धिः॥
ननु दीपस्य बीजापरिनयनेनांकुरप्रतिबंधकं तदनन्तरमंकुरोत्पादप्रसंगात्। तस्मादगत्या अंकुरो
त्पादानुकूलं बीजनिष्ठं किंचिदतीन्द्रियं दीपापरिनयनेन स्यविनाश्यमवश्यं स्वीकर्तव्यमिति। मैवं
दीपापरिसंबंधाद्यं चानावस्थानादितसंसर्गानावस्थत्वकारणत्वात्। न चानुमानाच्छक्तिसिद्धिः।
प्रथमानुमानेऽङ्गोत्कृष्टद्रव्यत्वस्योपाधित्वात्। द्वितीयानुमाने प्रत्यक्षगुणान्यत्वस्योपाधेः स
त्त्वात्। एकत्वत्यासाध्यविशेषणे द्रव्यत्वस्यैवोपाधेः सत्त्वात्। तृतीयानुमाने स्थितस्थापाकनसिद्धि
साधनमव्यापकषड्द्रव्यसमोपाधेस्तथैव सत्त्वात्। सर्वेषामेवाप्रयोजकत्वाद्धिति॥ ॥५॥ ॥७

॥नञ्चक्त्वाधेयशक्तिः॥

कर्म्मत्वप्रसंगात्। न चान्यसमवेतक्रियाफलशालित्वं कर्मत्वं। आत्मानमात्मना जानातीत्यत्रात्म
नोऽकर्मताप्रसंगात्। न चात्मनोऽत्र न मुख्यं कर्मत्वं मुख्यत्वे बाधकाभावात्। तस्मात्करण
व्यापारविषयकारकत्वादिकमन्यत्कर्मलक्षणं वाच्यं। तथा ग्रीवैदेः प्रोक्तम् फलाश्रयत्वे
पि न कर्म्मत्वानुपपत्तिः कामिनीवरणाघातजन्यव्यापारत्वेन वृक्षस्याप्यतिशयकल्पन
मपि न वाच्यं। वरणाघातजनिताध्यात्मिकवायुक्रियाजनितनागांतराकर्षणेन वृक्षोपष्टंभा
देपि तदुपपत्तेः। वरणाघातेन तु कर्तृसमवेतमदृष्टमुत्पाद्यत इति केचित्। न चान्यस्य शुद्धिप
दार्थस्य निर्विकल्पकत्वात् काश्यादौ तत्संयोगप्रयोज्यातिशयकल्पनमिति युक्तं तत्र तत्स
मयावच्छेदेन तत्समादियोगप्रतियोगिकानादिसंसर्गाभावविरहस्य तत्समानकालीनं न चाऽ
लादिस्पर्शाद्रियौगिकयावदनादिसंसर्गाभावसामानाधिकरण्यस्य शुद्धिपदार्थत्वात्।
एवमेतद्विपर्यायेण शुद्धिपदार्थोपि निर्वक्तव्यः शुद्धिजनकत्वाभिमतेन गंगादिये

मू०

ना३

१८

तदर्थं व्रीहिनिष्ठातिशयकल्पने। न च संयोगस्य न प्रोक्षणफलत्वात् तत्तत्संयोगावच्छिन्नद्रवद्रव्य
कर्मविशेषस्यैव प्रोक्षणपदार्थत्वादिति वाच्यं। ग्रामं गच्छतीत्यादावपि तथात्वेन ग्रामकर्मत्वानु
पपत्तिप्रसंगात्। तस्माद्यथा तत्र गमनविशेषणत्वेपि संयोगस्य तदाश्रयतया ग्रामकर्मत्वं
भवति। तथात्रापि वाच्यं। कथमन्यथा सक्तून् प्रोक्षतीत्यादौ लौकिकप्रोक्षणे सक्तूनां कर्मत्वं।
किंच व्रीहेः प्रोक्षणजन्यसंस्कारान्यतरापूर्वकल्प्यमाना प्रतिव्यक्ति भिन्नाः संस्काराः कल्प
नीयाः। तावद्वातिरिक्तमेव वा। न तावदाद्यो गौरवप्रसंगात्। न द्वितीयः किंविव्रीहिविनाशे तत्तन्ना
शस्यावश्यकत्वे व्रीह्यंतरस्योत्तरत्रोपयोगो न स्यात्। न च यावदाश्रयनाशात्तन्नाश इति यु
क्तं। यावत्त्वस्यापि गौरवकरत्वेनातत्त्वे देहे दकत्वात्। यद्वा पुरुषसमवेतेनापि संस्कारेण स्व
रूपसंबंधाद्व्रीहेः कर्मतोपपत्तिः। किंच किं कर्मत्वं यस्यात्रानुपपत्तिः। न तावत्क्रियाफलभा
गित्वं घटं जानातीत्यादावव्याप्तेः। ज्ञानेन लक्षणक्रियाजन्यसंस्कारफलभागित्वेनात्मनोपि

अन्यस्य चाक्षुषत्वनियामकत्वा

नासिद्धसाधनात्। नाप्यसाधारणाकरणिकेति साध्यनिर्देशोपि मनःसिद्धिः। निस्पर्शाद्यन्तर्त्वेखि-

चा२

तयार्थान्तरत्वात्। नापींद्रियकरणिकेति साध्ये ताद्दिसिद्धिः। चयेव सिद्धसाधनात्। अतिरेकेप्यणुत्वा-

द्यसिद्धिः। विभुत्वेनैव सिद्धिः सर्वदा स्पर्शरहितद्रव्यत्वादेर्विभुत्वसाधकस्य सत्वात्। न च वि-

भुत्वपक्षे व्यासंगानुपपत्तिः व्यासंगस्यैव ज्ञानानां न रोत्पत्तिप्रतिबंधकत्वात्। एकदानेकबुद्धि-

जनकत्वा

क्रियानुपपत्तिः ज्ञानवस्तुत्वादिप्रादेशिकत्वानुपपत्तिः विषयप्रादेशिकत्वेनैवोपपत्तेः। म-

नोऽणुत्वपक्षेपि तस्यैवोपपत्तिव्यक्तत्वात्। अन्यथाणुमात्रदेशतासुखस्यास्यात्। सर्वांगीणसुखवि-

स्प

षयसंबंधे सर्वांगीणमेव सुखमुत्पद्यते। बुद्ध्यापाए एव व्यासंग। नियामकत्वात्। किं च मन्य-

२०

था मनोऽणुत्वपक्षे वीणानादाकर्णनव्यासक्तस्य नजरीरखाकर्णनमिति नियमः कथं वाच्छिन्न-

गाधादिशरीरत्वाग्रवेष्टोक्रमः प्रयत्नवदात्ममनःसंयोगस्य तत्कारणत्वात्। तस्य च मनोयोगं

विनानुपपत्तेः॥ ॥अत्रोच्यते॥ ॥व्यासक्तस्यादेवदत्तस्य घटसंयुक्तचक्षुरिंद्रियं घटसाक्षात्कार

द्र.ति.२

गेन तास्त्रादौ तत्तद्व्यदेवतासंनिधिरेव क्रियते। स एव शुद्धिपदार्थः। अशौचापादकसंबंधेन
तद्विरहः स एवाशुद्धिपदार्थः। अन्ये तु तस्मादिप्रयोक्तृनिष्ठ एव संस्कारस्तेन जन्यते। स एव शुद्धि
पदार्थः। अशौचोत्पादकेन तदपनयो जन्यते। स एवाशुद्धिपदार्थ इत्याहुः। प्रतिमादौ तु प्रति
ष्ठादिना देवतासंनिधिरेव क्रियते। स चाहंकारममकारत्ववादैलक्षणैस्तत्र था घटादावपि शु

दि ५

द्धप्रतिज्ञत्वादिकत्वमपेक्ष्य प्रतिष्ठाविधिना जन्यप्रयोजकीभूतधर्मो जन्यते। अशुद्धिमपे
क्ष्य पराजयप्रयोजकोऽधर्मो जन्यते। एवं परमाणुगतपाकविशेषात्। तत्पार्थिवकार्ये वि
शेषोऽदृष्टव्यञ्जनादौ तु दृष्टादिनिमित्तभेदात् कार्यवैचित्र्यमूहनीयं। न च शक्तिव्यवहारा
न्यथानुपपत्त्याऽतिरिक्तपदार्थकल्पनं कारणत्वेनोपपत्तेरित्युपरम्यते॥ ॥८॥ मनस्त्वं प
रमाणुवृत्ति न वा। मूर्तत्वं निःस्पर्शवृत्ति न वा। इत्यादिविप्रतिपत्तिः संशयसंजनेविकारावद्धा
रः। सुखप्रतिपत्तिः सकरणिका क्रियात्वात्। रूपप्रतीतिवत्। इति प्रमाणेन समीचीनं शरीरादि

मू०

साधकत्वमिति। नैवं। सुखादिप्रादेशिकत्वनियमार्थं प्रादेशिकासमवायिकारणमंगीकर्त्तव्यं।।
विभुकार्ये तथैवावधीरणात्। न च शरीरसंयोगस्य तथात्वं। सकलशरीरावच्छेदेन तदुत्पत्तिप्रसं-
गात्। न च तदवयवानामवच्छेदकत्वं। अवयवाव्यापिसुखस्याप्रदर्शनात्। न च तत्राप्यन्यस्या-
वच्छेदकत्वं ■ अननुगमात्। न च विभुमनःसंयोग एवासमवायिकारणं प्रादेशिकत्वानु-
पपत्तिप्रसंगात्। न च तत्राप्यन्यस्यावच्छेदककल्पना। शरीरादीनामवच्छेदकत्वे ह्यो षस्यो के-
त्वात्। अतिरिक्तस्यासिद्धत्वात्। सिद्धत्वे वा तदेवांतदेवमनःस्थाने निषिध्यतां। योगशास्त्रे बो-
धितप्रत्याहारान्यथानुपपत्त्या मनोऽप्यु च सिद्धिरिति कश्चित्। न च मनोऽणुमात्रदेशतापत्तिः
सुखादीनामिति वाच्यं। यावदवच्छेदं ■ समवायिकारणं वर्त्तते। तावदवच्छेदेनैवेयमपि
नश्वतावदवच्छेदेनैवेति नियममंगीकुर्मः। न च छिद्रितच्छिन्नाग्रधाशरीरखलनानुपपत्तिः मनो-
तरप्रवेशस्याप्यवश्यादुपपत्तेः। समयसौक्ष्म्यानाकलनाद्धातचयोगपद्याभिमानः भवगवत्या

व्याप्यत्वस्य
= ५

२१

ना३

४त्वपत्तेअणु४

कारणं किंचिद्रूपसंयोगरहितं। तदा घटसाक्षात्काराजनकत्वात्। त्वगिंद्रियासंयुक्तघटवदिति ता
वदव्यापककरणसिद्धिः। तस्य चावयवकल्पनायां गौरवमित्यनवयवत्वेनैव सिद्धेः। न च तत्स्प
र्शवत्। स्पर्शवत्तो गंधग्राहकस्य घ्राणत्वप्रसंगे रूपग्राहकत्वप्रसंगात्। एवं तैजसत्वे चक्षु
ष्ट्वप्रसंगेनापि गंधाग्राहकत्वमापादनीयं। यद्वास्तु रूपाद्युपलब्धिरिंद्रियकरणिका। जन्यसाक्षा
त्कारप्रतीतित्वात् रूपप्रतीतिवदित्यपि मनसि प्रमाणं। न च तत्त्वासिद्धः साधनं स्पर्शोपयहेनै
व तत्कारणत्वावधारणात्। न चैवमणुत्वासिद्धिः व्यासंगस्य धारावहनज्ञाने क्रमवदुपप
त्तिरिति वाच्यं। तत्र हि पूर्वपूर्वज्ञानापेक्षितत्वमेवोत्तरोत्तरस्य विशेषणज्ञानत्वेनापेक्षणात्। न
नु तथापि कुतूहले वास्तु नियामिका तस्याश्च वशं यनियामकत्वेनांगीकर्तव्यत्वात्। व्यवदायोन्मील
नेपटप्रकाशनं क्रमेणेव तिथुनुसोपगमात्। तस्मादन्यथासिद्धव्यासंगस्य कथंमनोऽणुत्व

म २

राश०

स्य२ क२ मू०

न च संसर्गविशेषासिद्धिः घटितयोगिन एव तत्र विशेषत्वात् । तस्य च पदरूप धर्मतावत्त्वासिद्ध्यवि
रोधादिति ॥ ॥अत्रोच्यते ॥ ॥घटमानयेत्यस्य वाक्यं च लक्षज्ञानानुमापदेऽपि तत्र प्रतियोगिविशे
षापरक्तसंसर्गगोचरत्वेऽपि न घटकमर्मकानयनसिद्धिः अत्र पदरूपधर्मतापात्रस्य मर्थाति
घटानयनयोरन्यथापि संसर्गसंभवत्वत् । एवमर्थपदके पि दूषणमहनीयम् । यत्र वा वक्तु
त्वेसंसर्गज्ञानं श्रकवद्वावयमात्रमसोत्र पुंक्ते तत्र कथं वक्तृज्ञानानुमानेन च तत्र संसर्ग
प्रत्यय एव न जायते । बाधकाभावात् । प्रतीतेरनुभवसाक्षिकत्वाच्च । किंच केयमाकांक्षा ॥ यथा
हेतुविशेषणीपन्नतावस्प्रतिपाद्यजिज्ञासा घटो भवतीत्यत्र क्रियादिविशेषाकांक्षया
साकांक्षप्रसंगात् । तथा च किंचिदपि वाक्यं न निराकांक्षं स्यात् । समभिव्याहृतपदार्थविषया
सेति चेत् । न । एतस्याः सर्वत्राभावात् । तथाह्यनिछन्नपि वक्तुरेषा दरिद्रवाक्यादुत्थ पमनुभव इति ।
एवमपि साङ्ख्यातत्ताकारणेन प्रमाणाभावात् । तथा च कथमनपाहितुमर्मनः सोऽयागोनैर्विशेष

रा२ व१

णवैपेन संयोगाद्युत्पत्तिरिकेवित्। एवमणुत्वे सिद्धे पूर्वन्यायेन पृथिव्यादिभिन्नत्वेव स्पर्शक
ल्पनायां कल्पनागौरवमेव बाधकमिति न किंचिदनुपपन्नमिति॥ ॥७॥ ॥इह शब्दस्य स्वातं
त्र्येण प्रामाण्यमनिच्छन्तोऽनुमानभावेन प्रामाण्यमिच्छन्ति वैशेषिकादयः। तेषामयमाशयः।
गामानयेति वाक्यश्रवणानंतरमन्वयप्रतीतिस्तावदनुभूयते। वाक्यं चाकांक्षादिमत्त्वप्रति
संधानं तदर्थप्रतिपत्त्यनुकूलं न पाऽवधृतं। तथा चाकांक्षादिमत्पदकदंबकप्रतिसंधानस्या
वश्यकतया तस्य च स्मारितार्थसंसर्गविज्ञप्तिपूर्वकत्वनियमेनानुमानादेव तत्फलसिद्धौ
किमिति शब्दस्य प्रमाणांतरत्वाभ्युपगमः। तथा ह्येतानि पदानि स्मारितार्थसंसर्गज्ञानपूर्व
काणि आकांक्षादिमत्पदकदंबत्वात्। गामभ्याजेति पदकदंबवदिति ज्ञानावाच्छेदकतया संसर्ग
सिद्धिरनुमानादेव संभवति। अर्थपदके अनुमाने साक्षादेव संसर्गसिद्धिः। एवं हि तत्र एतत्पदा
र्थामिथःसंसर्गवंतः। आकांक्षादिमत्पदकदंबस्मारितत्वात्। गामभ्याजेति स्मारितपदार्थवत्॥

२१०

मु०२

मस्त्वितिचेन्नपाकरं।तथाहि।आकांक्षादिमत्तया तावत्संसर्गप्रत्यायकत्वं वैदिकवल्लौकिकेपि साधारणं।नच
लौकिकतात्पर्यग्रहापेक्षयातिलिंगत्वात्पर्यग्रहस्यापि यथाबोधानां गत्वात्।तात्पर्यसंशयेपि वाक्यार्थबो
धदर्शनात्।अन्यथाऽर्थान्यथीकृत्य वेदेऽपि सर्गानुमाने संभवात्तेस्याननुवादकर्तृस्यास्तां विस्तरः॥
॥ ॥ज॥ ॥अत्र कर्म्मतत्वज्ञानयोः समुच्चयवत्समुच्चये नापवर्गकारणत्वमित्येके तत्वज्ञानद्वारा कर्म्मणां
तत्र कारणत्वं।तथा च न तुल्यवत्समुच्चय इत्याचार्याः।तत्र तेषामयमाशयः।तीर्थविशेषस्नानयमनि
यमादिकर्म्मणां तावन्निःश्रेयसकारणत्वं शब्दबलादवगम्यते।तत्र निःश्रेयसे जनयितव्ये तत्वज्ञान
व्यापारकत्वं तेषां न तावच्छब्द एवावबोधयति।तत्रास्यौदासीन्यात्।न च कर्म्मणामाश्रुतरविनाशि
त्वेन व्यापारोऽवश्यं स्वीकर्त्तव्यः।तत्र दृष्टेन तत्वज्ञानेनैवोपपत्तौ अदृष्टकल्पनायाअयुक्तत्वात्।
तत्वज्ञानव्यापारत्वे कोसिद्धिरितिवाच्यं तत्वज्ञानस्याप्यव्यवहितत्वेन तदर्थमपि कारणतानिर्वाहार्थ
मदृष्टव्यापारकत्वस्यावश्यकल्पनीयत्वात्।तथा च निःश्रेयसे जनयितव्येऽदृष्टमेव तदास्तामाव

दित्या ३

23

व२

पा२

तीयः नवान्वयानुपपत्तिराकांक्षा। अयमेति पुत्रो राज्ञः पुरुषोपसार्यतामित्यत्र पुरुषस्यान्वयेनाकांक्षपपन्नत्वात्स
मभिव्याहारस्य राज्ञ इत्यस्य पुत्रेणासाकांक्षताविरहप्रसंगात्। नवान्वयापर्यवसानीसापेक्षत्वं वाकांक्षा॥
अनयोर्निर्वक्तुमशक्यत्वात्। नाप्यविनाभावमाकांक्षा स्वीकुरुषा घटत्वकृतत्वमित्यत्राविनाभावात्रा
वः पिअन्वयाबाधदर्शनात् यथा कथंचिद्विनाभावस्य गोरश्व इत्यादावपि भावात्। तस्माज्जिज्ञासाप्र
तियोग्यता आकांक्षा सा तु समभिव्याहारविशेषः यथान्वते कदाविशेषः कथं तेन कदा विज्ञायेत इति
यते जिज्ञासा। स च गोरश्व इत्यादौ नास्ति। तेन कदाचिदपि समभिव्याहृतपदार्थविषया जिज्ञासाया पा ६
अजननात्। एतदेवाभिसंधायाकांक्षा तरितदुत्पाद्यसंसर्गविषमे गेत्रागतावश्यकाकांक्षेति। न चैषान्वयज्ञा
नजननयितव्यस्याज्ञानमपेक्षते। तथा चैवाव्याप्तिज्ञानविषयवाक्यज्ञानस्यान्वयबोधकतायामेव कत्वप
नागोरवधूराघातः अपि वक्त्याप्तिसंशयेपि विशेषू बोधस्य जायमानत्वात्। पुरुषेणां वैदिकवाक्यस्यस्वा
तंत्र्येण प्रमाण्ये लौकिकेत्तु वक्तृज्ञानानुमानादेव संसर्गसिद्धौ तस्यानुवादकतामात्रमिति यदभ्युपग

त्याश्रमविहिते न गृहस्थस्यापि मोक्षश्रवणादिति। मैवं। निःश्रेयसहेतुतया प्रतिपादितैरेव यमनियमा
दिभिः समुच्चयसंभवात्। न च कर्म्मणां परस्परव्यतिचारान्निःश्रेयसे स्वर्गवद्वैचित्र्यात्तावान्न तत्र
तिकरणत्वमिति वाच्यं स्यात्तात्विकविशेषविरहेऽपि प्रतियोगिभेदेन। विशेषस्य निःश्रेयसेऽपि विरो
धात्। एतस्य चातावद्रूपकार्यावच्छेदकपर्यवसानात्। कथमन्यथाश्रयनाशपाकयो रूपनाशस्यैभि
न्नकारणत्वमिति न च ज्ञानस्य विहितत्वाददृष्टजनकत्वेनादृष्टस्यैव प्राधान्यं। दृष्टेनैवोपपत्तौ
दृष्टकल्पनायोगात्। न चावघातवन्नियमादृष्टकल्पना। तत्र वैतुष्यस्यान्यथापि संभवेन निय
मादृष्टकल्पना। अत्र तु मिथ्याज्ञाननिवृत्तेरन्यथासंभव इति विशेषादिति॥४॥ अत्रोच्यते। यद्यपि त
त्तत्कर्मविशेषस्यापवर्गकारणत्वं शास्त्रबलादवगम्यते तत्त्वज्ञानस्य व्यापारत्वेन शाब्दं। तथा
पि कर्म्मणो न तावत्तत्त्वज्ञाननिरपेक्षस्य मिथ्याज्ञानोन्मूलने व्यतिरेकेण कारणत्वसंभवो विच्छि
दानात्तदुन्मूलनस्य तत्त्वज्ञानसाध्यत्वेन लोकत एवावधारणात्। तथा च तत्त्वज्ञानमवश्यमपे

धां ८

स्यकत्वात्। उत्पन्नेपि तत्त्वज्ञाने यमादिकमवश्यमनुष्ठेयं तदानीमपि मोक्षार्थिनायमनियमादावधिकारान्न पाया
त्। नचोत्पन्ने तत्त्वज्ञाने श्रौनियसोस्पत्ते यमनियमाद्यनुष्ठानानवकाशत्वमिति वाच्यं। नह्येकस्मात्तत्त्वज्ञानाद
पवर्गस्तदन्त्यासश्रवणात्। तथा श्रुतिः। अंधंतमः प्रविशंति संसारे ये विद्यामुपासते। ततो भूय इव ते तमो य उ वि
द्यायां रताः। अस्यार्थः। अविद्या कर्म। तदुपासनेन तत्रैवासक्ताः त्तवंति तेऽधंतमः प्रविशंति। संसारान्न प्रच्यवंते॥
न केवलं कर्मोपासनेन जन्मादिविच्छेदः। ये च विद्यायां रताः विद्या तत्त्वज्ञानं तन्मात्रासक्ताः ते भूयोऽतिशयेनांधंतमः
प्रविशंति नित्याकरणे प्रत्यवायस्य बहुलत्वात्। न च नित्यस्यापि संन्यासः तत्संन्यासस्य प्रतिक्षिप्तत्वात्। समुच्च
यप्रतिपादिकापि श्रुतिः। ततो विद्यां चाऽविद्यां च यस्तद्वेदोभयं सह। अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते।
अविकर्मी विद्यां च तत्त्वज्ञानं च सह तुल्यवत्तु यो वेद श्रोमोतीति वेद इति प्रयोगस्य विहितत्वात् इति चेन्न सत्त्वे नास्करी
ये दर्शितत्वात्। तमेव विदित्वाऽतिमृत्युमेति नान्यः पंथा विद्यतेऽयनायेति वाक्ये तत्त्वज्ञानस्यापवर्गसामग्री नि
वेशननियमपरं न तु वाक्यांतरावष्टंतकारणांतरवारकं दासार्थं न तु समुच्चये उपपत्तिविरोधः। तथाहि काम्यानामि
त्तिकात्यां कर्मत्वान्न समुच्चयः तयोस्यागात्सनित्येन। एकैकशो व्यभिचारात्। साकल्येनासंभवात्। नापि य

धातोः ४

रव्यवच्छित इति प्रयोजनत्वमेव न संभवतीति तद्व्यवच्छेदार्थमपवर्गो विविच्यते। दुःखजन्मप्रवृत्तिदो
षमिथ्याज्ञानानामुत्तरोत्तरापाये तदनंतरापायादपवर्ग इति। तत्र नित्यनिरतिशयसुखाभिव्य
क्तिर्मुक्तिरिति तौतातिताः। जीवस्य लिंगशरीरापगम इति भास्करीयाः। प्रकृतितद्विकारोपशमने
विमिलयेत्तु रुषस्य स्वरूपेणावस्थानमिति सांख्याः। निरुपप्लवा चित्तसंततिरित्यन्ये। अग्रिमविज्ञा
नुत्पादे पूर्वविज्ञाननिवृत्तिरित्यपरे। आत्महानमित्येके। दुःखप्रागभावपरिपालनमिति मीमांस
काः। आत्यंतिकी दुःखनिवृत्तिरिति गौतमीयाः। तत्र सर्वेषामनुपपन्नत्वाच्चरम एव पक्षो न्याय्यः।
तथा हि न तावदाद्यः। तथाविधसुखे प्रमाणाभावात्। नित्यं विज्ञानमानंदं ब्रह्मेति श्रुतिरेवात्र
प्रमाणं। न च नित्यसुखस्यासाध्यत्वादपुरुषार्थत्वमिति वाच्यं। तदभिव्यक्तेरेव पुरुषार्थत्वा
त्। न चाभिव्यक्तिरपि यदि नित्या तदा न पुरुषार्थः सिद्धत्वात्। अथानित्या तदा वा सन्नस्य भाव
स्य विनाशित्वनियमादभिव्यक्तेर्विनाशे मुक्तस्य संसारित्वप्रसंगः। न च तदनंतरमभिव्यक्त्यंतर

२५

= तत्त्वज्ञानप्रतिबन्धकदुरितनिवृत्तिः। ६

हणीयं। एवं च निःश्रेयसे जनयितव्ये यावत्तदनुकूलं जनयं तत्सर्वं कर्मणा उपसंग्रहणीयं। एवं च तं च तत्त्वज्ञानं। तथा च तेन किमिति जननीयं। इदमेव च तत्तुल्यकक्षतया समुच्चयो नेष्ट इत्यनेनैव विवक्षितं। एवं च तत्समुच्चयेन नो विवादः। किंच यमनियमादेः कर्मविशेषस्य तत्त्वज्ञानानुकूलत्वं तावच्छास्त्रादेवावगम्यते। तथा च विवादास्पदीभूतस्यापि कर्मणः तद्द्वारेणैव जनकत्वं कल्प्यते। लाघवात्। श्रुतिविनिर्मोक्षफलत्वेन श्रुतस्यापि वाराणसीप्रयागादेस्तत्त्वज्ञानोत्पादकस्य शास्त्रादेवावगतत्वात्। तेषां च कर्मणां तत्त्वज्ञाने जनयितव्ये सत्त्वशुद्धिरेवावान्तरव्यापार इति। न तदर्थमपूर्वकल्पना। न च वाराणसीप्राप्तिमरणादिव्यतिरेकेण तत्त्वज्ञानस्याप्यनुत्पत्तिप्रसंगः। अपवर्गेऽप्यस्य समानत्वात्तत्राऽवान्तरविशेषकल्पनमिति यदि प्रकृतेऽपि तुल्यं। श्रुतिरपि तत्त्वज्ञानकर्मणोः कारणतामात्रं बोधयति। न तु तुल्यकक्षतया समुच्चयमिति सांक्षेपः। अपवर्गे विप्रतिपत्तिः। अपवर्गस्तावदान्वीक्षिकीप्रयोजकत्वेन महर्षिणा दर्शितः। स च नानाविधविप्रतिपत्तिकवत्तित्वा

॥ इति ज्ञानकर्मसमुच्चयवादो नवमः ॥९॥ समाप्तः ॥ ९२ ॥

न २

आ

देवा

भेद इति वाच्यं। तथा सति वाक्यभेदप्रसंगात्। न हि नित्यत्वविशेषणेनासुखेनान्वयसंभवः अयोग्यत्वात्॥
किं च ब्राह्मणेऽलिंबा। किं च सुखात्मेदाबाधनमपि ब्रह्मणोऽनुपपन्नमेव। तस्य सुखरूपत्वमितिश्रुत्यैवेनत
दाश्रयत्वेन विषयीकृत्य प्रमाणत्वात्। न च ब्रह्मात्मेदान्यथानुपपत्त्या नित्यसुखसिद्धिरिति वाच्यं
इतरेतराश्रयप्रसंगात्। सिद्धे हि तथाभूते सुखे ब्रह्मात्मेदप्रतिपत्तिः। ब्रह्मात्मेदप्रतिपत्तौ तथा
भूतसुखसिद्धिरिति। तस्माद्बाधितग्लावानः एवं तदिति श्रुतिवदुपचरितार्थत्वमेव श्रुतेर्युक्तं।
एवमानंदं ब्रह्मणो रूपं तच्च मोक्षे प्रतिष्ठितमित्यत्रापि आनंदस्य ब्रह्मधर्मत्वेनैव प्रतीतेर्मोक्ष
पदेन जीवन्मुक्तिरेव विवक्ष्यते त्वन्यथासिद्धो न सुखस्वरूपे तस्मिन्प्रमाणं श्रुतिः। प्रत्युत दुःख
नात्यंतं विमुक्तश्चरतीत्यादिश्रुतिबलात् स्वयंप्रतिकदुःखविरहत्वमेवापवर्गस्य प्रतीयते। तथा
च प्रमाणबलेन नावत्वं [illegible] कारणव्याप्तिसंकोच इति मद्उक्तं तस्मादात्मविध्वंस तु घटादिकप्र
तियोगिकत्वं वत् तथा कल्पनात्। नादृष्टकल्पनापि दोषायेति संक्षेपः। द्वितीयस्यापि मन्त्रार्थः॥ लिंग
शरीरस्य एकादशेंद्रियपंचभूतरूपस्य जीवात्मन्यपगमो विशिष्टे षः। स एव परे ब्रह्मणि लीन इति।

२६

२ तन्निष्ठ

सुत्पद्यते। तदुत्पादकस्य शरीरादेर्भावात्। न च शरीरादिकमपि तदा कल्पनीयं त्वयानभ्युपगमात्। अभ्यु
पगमे वा तन्नित्यतदुःखाद्युत्पत्तिप्रसंगादिति भावः। प्रमाणबलेनोत्पन्नस्यापि भावस्याविनाशित्व
कल्पनात्। अन्यथोत्पन्नस्य प्रमेयस्य विनाशित्वदर्शनात् ध्वंसस्यापि विनाशित्वं कल्पेत। प्रमाणबलेन त्वाव
मात्रव्याप्तिसंकोच इति यदि तत्रापि प्रमाणबलात् तथात्वे तन्नित्यव्यक्तिव्यतिरिक्ते भावे व्याप्तिः संकोच्यतां।

रा ५

अनित्यव्यक्तिस्वरूपोत्पादपि शरीरादिकं विनानानुपपत्तिः। तथा त्वतान्नित्यव्यक्तौ शरीरादिव्यतिरेकस्यैव का
रणत्वं प्रमाणबलेन तथा कल्पनात्। अत एव तस्य सुखस्य संसारिदशायां शरीरादिनैव प्रतिबंधान्न
नित्यव्यक्तिः तथा च न योग्यानुपलंभबाधोऽपि॥ ॥अथोच्यते॥ ॥अत एव तस्य॥ न तावदेवं वदितुं शक्यते नित्य
सुखे प्रमाणं तथाहि लोकप्रसिद्धेन सुखेनानेन याऽशक्त्या ब्रह्मानंदो बोध्यते। सुखांतरेण वा न तावदा
द्यः। लोकसिद्धसुखस्य विनाशित्वेन ब्रह्मानंदे बाधात्। नेतरः। सुखांतरं हि प्रमाणांतरसिद्धं शक्ति
सिद्धं वा। न तावदाद्यः तथाविधसुखबोधकस्य प्रमाणस्याभावात्। न द्वितीयः। शक्तिः सुखनित्यता
ऽसामर्थ्यात्। न च नित्यत्वविशेषणवशात् अप्रमतस्तानव नित्यं शक्त्या बोध्यते। अनंतरं तेन सह ब्रह्म

रा ६

तर २ सुखं १

त्यज्यतामिति

त्वेन तदुत्पादकनिर्वर्त्तनस्याशक्यत्वात्। न च दुःखहेतूच्छेद एव तत्प्रागभावपरिपालनमिति वाच्यं।
तन्मात्रस्यैव पुरुषार्थत्वेन वार्थान्तरोपपत्तेः तस्यां दशायां प्रागभावानुवृत्तौ प्रमाणाभावात्।
एतेन कस्यचित्प्रागभावस्य प्रतियोग्युत्पत्तिनियतत्वमपि निरस्तं। अन्यथोपपत्तेर्दर्शितत्वात्।
न च प्रागभाव एवोत्तरसमयसंबंधित्वेन साध्यत इति वाच्यं। तदुत्तरसमयसंबंधो हि किं नवम
द्रव्यसंबंधो वा तदुपाधिसंबंधो वा स्वरूपमेव वा। अतिरिक्तो वा। न तावदाद्यः। नवमद्र
व्यस्वरूपसंबंधस्याकार्यत्वात्। प्रागभाववत्तत्रदसाध्यत्वात्। न द्वितीयः। उपाधेरागन्तुकत्वेपि
स्वकारणाधीनतया यत्नसिद्धत्वात्। अतिरिक्तसंबंधस्यानंगीकारात्। अप्रामाणिकत्वाच्च
ति किंच कृतेन। नन्वात्यन्तिकी दुःखनिवृत्तिरप्यनुपपन्ना। तथा हि। दुःखनिवृत्तिर्दुःखध्वंसो वा वि
वक्षितः। आत्मावान्तरत्वान्न तावदाद्यः। उत्पन्नदुःखध्वंसस्यायत्नसिद्धत्वेन तदर्थं प्रवृत्त्यनुप
पत्तेः। अनुत्पन्नप्रतियोगिकस्य दुःखध्वंसस्याशक्यत्वात्। प्रत्येकं दुःखोत्पादार्थं प्रवृत्तिश्च

१७

वस्थत्वयहेत्वस्यापातात्। अयमप्यनुपपन्नः। तथात्वे तस्य पुरुषार्थत्वमानाभावात्। दुःखहेतुविवक्षायां
सिद्धान्तानतिरेकात्। न तृतीयस्तथाविधप्रक्रियायां मानाभावात्। अन्यदर्शनाभ्युपेतपरत्वे
वा विप्रतिपत्तेः। नापि चतुर्थः। किमिदं निरूपणत्वं दुःखविरहितत्वमिति यदि तदा तावन्मात्रस्य
पुरुषार्थव्यवस्थितौ चित्तसंततेरकाम्यत्वेन तदुच्छित्तेर्वावारात्। न च मुक्तिदशायां चित्तसंततेः खस्था-
नं संभवति तत्वान्न संतानस्य विनष्टत्वात्। अन्यस्यापि शरीरादिव्यतिरेकेणोत्पादासंभवान्ना-
पि मुक्तिदशायां तन्न कारणमिति वाच्यं तन्मात्रे तत्कारणं धारणत्वादिति। नापि पंचमः। पूर्वचि-
त्तनिवृत्तेरयत्नसिद्धत्वेन तदर्थं प्रवृत्त्यनुपपत्तेः। अग्रिमचित्तानुत्पादस्य प्रागभावरूपतया
ऽसाध्यत्वात्। ध्वंसस्यासंभवात्। न चावि चित्तनिवृत्तेः कथमपि पुरुषार्थत्वं सुखदुःखस्वाभावेतरत्वा-
दिति। नापि षष्ठः। आत्महानस्यानुद्देश्यत्वात्। नित्यतयाऽशक्यत्वाच्चेति। नापि सप्तमः। प्राग-
भावस्य प्रतियोग्युत्पत्तिनियतत्वेन मोक्षानंतरं दुःखोत्पत्तिप्रसंगात्। प्रतियोग्युत्पत्तेरावश्यक-

लाव ६

किंच२ नहत्वात्। नहैनेन नमुक्तेरुद्देश्यतावच्छिद्यते। अत एव संस्काराजनकानुत्पन्नध्वंसत्वाद् दृष्टनाशनाश्य
दुःखध्वंसश्चेन्निरस्तौ। अदृष्टनाशनाश्यत्वमपि दुःखस्यासिद्धमेव। दुःखस्य भोगैकनाश्यत्वात् संप्रा-
क२ यस्य संस्काराजनत्वे न संसारदशायामपि प्रसंगादित्याहुः। नाप्यजनकदुःखध्वंसस्यासिद्धेः। ति त्वंत
गत्वेनानुमितौ विषयीकृतयोगिसाक्षात्कारं च जनकत्वस्य संभवात्। नापि सकलात्मविशेषगुण-
ध्वंसत्वं सकलदुःखध्वंसत्वं वा। मिलितप्रतियोगिकध्वंसस्यासिद्धेः। नापि दुःखध्वंसमात्रं। प्रत्येकवि-
वक्षायां मतिव्याप्तेः। चरमध्वंसत्वमिति विवक्षायां तु तस्योपजीव्यत्वेनान्येषां परित्यागात्। नाप्यदृष्ट-
नाशाहेतुकानुत्पन्नध्वंसत्वं। अस्यापुरुषार्थत्वात्। नवप्रायणोत्थानुत्पन्नध्वंसेति व्याप्तेः। तस्य संस्का-
रेणैव विनाशोपपत्तेरिति॥ ॥अत्रोच्यते॥ ॥दुःखान्तरध्वंसस्यापलसिद्धत्वेपि तथाविधदुःख- २८
ध्वंसस्य प्रयाससाध्ययोगाभ्याससाध्यत्वात्। दुःखोत्पादनार्थं प्रवृत्तिप्रसंगाद् दृष्ट एव जीवन्मुक्ति-
दशायां तथा प्रमाणसिद्धत्वात्। किं च नोत्पन्नदुःखध्वंसार्थं प्रवर्तते। किंतु दुःखाहेतुसंस[illegible]
अनागतदुःखध्वंसार्थं वा०

ना३

संगात्। न चैवं दृश्यते। नेतरः। अज्ञानावांतरस्यासाध्यत्वेन पुरुषार्थत्वानुपपत्तेः। किं वा दुःखनिवृत्ते
रात्यंतकत्वं विवक्षितं समानाधिकरणदुःखासमानकालीनत्वमिति चेत्। न। एवं विषदुःखध्वंसे प्र
माणाभावात्। प्रत्युत दुःखध्वंसस्यैव समानाधिकरणदुःखसमानकालीननियतत्वेन तत्र प्रमा
णसद्भावात्। कथं वा अस्याः पुरुषार्थत्वं सुखस्यापि हानिर्व्यवस्थितौ तुल्यायव्ययफलत्वेना
नुद्देश्यत्वात्। न च जीवन्मुक्तिसमानकालीनसुखदुःखोद्देश्यप्रवर्तितौ परममुक्तेस्त्वन्यथालाभ
इति वाच्यं। परममुक्तेरपुरुषार्थत्वप्रसंगात्। रागाभावेन सुखस्योद्देश्यत्वानभ्युपगमाच्च।
किं वा परममुक्तित्वं समानाधिकरणदुःखासमानकालीनदुःखध्वंसत्वमिति चेन्न। नासुखां
तमुक्तौ सर्वमपि तथाविधदुःखध्वंसस्य ज्ञानत्वाद् ज्ञानगदशायां मुक्तत्वप्रसंगात्। न च दुःखांते
व मुक्तिः सुखमरणस्यापि श्रवणात्। नापि संस्कारात्मनं साक्षात्कारविषयदुःखध्वंसत्वं। सुखी
नमुक्तौ योगदशायां मुक्तत्वप्रसंगात् मुक्तेरुद्देश्यतावच्छेदकजिज्ञासायामेवैतस्योपन्यासात्

के२

त्यज्यतामिति २

त्वेन तदुत्पादकनिर्वर्त्तनस्याशक्यत्वात्। न च दुःखहेतूच्छेद एव तस्त्रागन्तावपरिपालनमिति वाच्यं।
तन्मात्रस्यैव पुरुषार्थत्वेन वार्थान्तरोपपत्तौ तस्यां दशायां प्रागभावानुवृत्तौ प्रमाणाभावात्।
एतेन कस्यचित्प्रागभावस्य प्रतियोग्युत्पत्तिनियतत्वमपि निरस्तं। अन्यथोपपत्तेर्दर्शितत्वात्।
न च प्रागभाव एवोत्तरसमयसंबंधित्वेन साध्यत इति वाच्यं। तदुत्तरसमयसंबंधो हि किं नवम
द्रव्यसंबंधो वा तदुपाधिसंबंधो वा सोपि स्वरूपमेव वा। अतिरिक्तो वा। न तावदाद्यः। नवमद्र
व्यस्वरूपसंबंधस्याकार्यत्वात्। प्रागभाववत्तदसाध्यत्वात्। न द्वितीयः। उपाधेरागंतुकत्वेपि
स्वकारणाधीनतया यत्नसिद्धत्वात्। अतिरिक्तसंबंधस्यानंगीकारात्। अप्रामाणिकत्वाच्च
तिकिंचकृता। नन्वात्यंतिकी दुःखनिवृत्तिरप्यनुपपन्ना। तथाहि। दुःखनिवृत्तिर्दुःखध्वंसो वा वि
वक्षितः। आद्ये तावात्यंतिकत्वं। न तावदाद्यः। उत्पन्नदुःखध्वंसस्य फलत्वासिद्धत्वेन न तदर्थं प्रवृत्त्यनु
पपत्तेः। अनुत्पन्नप्रतियोगिकस्य दुःखध्वंसस्याशक्यत्वात्। प्रत्येकं दुःखात्पादार्थं प्रवृत्तिप्र

वस्थलयहत्युक्यात। अयमप्यनुपपन्नः तथात्वे तस्य पुरुषार्थत्वं मा नाभावात्। दुःखहेतुविवक्षायां
सिद्धसाधनत्वानतिरेकात्। नन्वेतीयस्तथाविधप्रक्रियायां मानाभावात्। अन्यदर्शनाद्युपेतपरत्वे
वा विप्रतिपत्तेः। नापि चतुर्थः। किमिदं निरूढं बद्धदुःखविरहितत्वमिति यदि तदा तावन्मात्रस्य
पुरुषार्थत्वव्यवस्थितौ चित्तसंततेरकाम्यत्वेन तदुच्छेदे निर्वाहात्। न च मुक्तिदशायां चित्तसंततेः स्वस्था
नं संभवति उत्पन्नसंतानस्य विनष्टत्वात्। अन्यस्यापि शरीरादिव्यतिरेकेणोत्पादासंभवात्। ना
पि मुक्तिदशायां तन्नकारणमिति वाच्यं। तन्मात्रेण कारणं धारणत्वादिति। नापि पंचमः। पूर्ववि
त्तनिवृत्तेरयत्नसिद्धत्वेन तदर्थं प्रवृत्त्यनुपपत्तेः। अग्रिमचित्तानुत्पादस्य प्रागभावरूपतया
ऽसाध्यत्वात्। ध्वंसस्यासंभवात्। न वा चित्तनिवृत्तेः कथमपि पुरुषार्थत्वं स्फुरखदुःखतावेतरत्वा
दिति। नापि षष्ठः। आत्महानस्यानुद्देश्यत्वात्। नित्यतयाऽशक्यत्वाच्चेति। नापि सप्तमः। प्राग
भावस्य प्रतियोग्युत्पत्तिनियतत्वेन मोक्षानंतरं दुःखोत्पत्तिप्रसंगात्। प्रतियोग्युत्पत्तेरावश्यक

लाव ६

कारत्वस्य समानाधिकरणधियोपलक्षणावच्छिन्नसवासनमिथ्याज्ञानध्वंसत्वस्य यथासंभवं जीवन्मुक्ति
परममुक्त्योर्लक्षणस्योहनीयत्वात् । उभयसाधारणं तु । सवासनमिथ्याज्ञानध्वंसत्वे तत्वसाक्षात्कारको
प्रागभावविरहत्वं योगजधर्मप्रागभावविरहत्वमित्यादि स्वयमूहनीयं । प्राचस्तु ॥ दुःखात्यंताभाव
एव मुक्तिरात्यंतिकी दुःखनिवृत्तिरित्यन्ये नैवं तस्य विवक्षितत्वात् । न चैवमसाध्यत्वे नापुरुषार्थत्वप्रसंगः ।
आकाशादेरपि मुक्तत्वप्रसंगो दोषापत्तेः दुःखध्वंसरूपस्य तत्संबद्धस्य साध्यत्वात् । न चावश्यकत्वेन ना-
स एव मुक्तिरिति वाच्यं । दुःखेनात्यंतं विमुक्तश्चरतीति श्रुत्या मुक्तिदशायामात्मनो दुःखात्यंताभा
वस्य बोधनात् । न च श्रुतावपि तथाध्वंस एव विवक्षित इति वाच्यं । अत्यंतविमोकपदस्यात्यंताभा
वव्युत्पन्नत्वात् । एवंविधध्वंसपरत्वे लक्षणाप्रसंगादित्याहुरिति संक्षेपः ॥ ॥१०॥ ॥सिद्धार्थस्यानु   २९
भावकताया अभावात्तत्र व्युत्पत्तिग्रहो नास्तीति केषांचिन्मतं । तत्रातेषामयमाशयः । प्रायोजकवृ
२२   द्धोदीतवाक्यश्रवणानंतरं प्रयोज्यवृद्धव्यवहारमाकलय्यन्तनव्यवहारकारणीभूतं तदीयज्ञा
नमवगच्छन् तत्र चावापोद्वापक्रमेण तत्पदानां कारणतामवधारयन् तत्र वाच्यवाचकता

क्रियंते१।

शायएतादवाप्तिसंक्षयदुःखहेतोर्दुःखत्वोपचारःशास्त्रैर्हेतूच्छेदेपुरुषव्यापारादित्याहुः॥नचतत्रापु
त्पन्नानुत्पन्नविकल्पसंभवेनायत्नसाध्यत्वमशक्यत्वंवाशंकनीयंउत्पन्नस्यैवदुःखहेतोरहिकं
टकादौलोकेहिपरिहारस्यपत्नसाध्यत्वदर्शनात्।नचयदितेनहेतुनादुःखमवश्यंजनयितव्यंतत्
दपरिहारानुपपत्तिनजनयितव्यंवाकिमर्थंपरिहरणीयंइतिवाच्यं।कंटकादिपरिहारेप्यस्यसमान
त्वात्।नचैवंविधदुःखध्वंसस्याप्रामाणिकत्वंदेवदत्तदुःखत्वंदुःखत्वमेववास्याश्रयासमानकाली
नध्वंसप्रतियोगिवृत्तिकार्यमात्रवृत्तिधर्मत्वात्।एतत्प्रदीपसंततितैलवदित्यनुमानस्यागमस्यचविद्य
मानत्वात्।तथाचदुःखध्वंसत्वसमानाधिकरणदुःखसमानाकालीनत्वव्याप्यं।नचतुल्यायव्य
यफलत्वेनापुरुषार्थत्वं।अतिदुःखितस्यसुखेपिवैराग्यदर्शनात्।नैवंविधपुरुषार्थत्वस्यप्रमाण
सिद्धत्वात्।नचसुखांतमुक्तौत्योगदशायामपिमुक्तत्वप्रसंगोदोषायेष्टत्वात्।यथोक्तार्थता।कदुःख
ध्वंसस्यैवमुक्तित्वात्।नचजीवन्मुक्तिपरमयुक्तत्वाव्याप्तिरित्तदकानुपपत्तिर्योगजादृष्टजन्यतत्त्वसाक्षा

जन्यज्ञानेनान्यथासिद्धिप्रसंगात्। न च स्वरसमात्रं फलमित्यत्राध्याहृत्य प्रवर्त्तत इति फक्किका। अध्याहारप्र
माणाभावात्। न च साध्यसाध्यता विघटकदुःखध्वंसस्य प्रसस्साध्ययोगात्यास साध्यत्वात् दुःखोत्पादनार्थं प्रवृ
तिप्रसंग इष्ट एव। जीवन्मुक्तिदशायां तथा प्रमाणासिद्धत्वात्। किं च परागस्य वाक्यार्थानुभावकतापो प्रयो
जकत्वं आकांक्षादिमत्वेनैव तदुपपत्तावन्यस्य गौरवकरत्वात्। न च सिद्धार्थादिसंसर्गाग्रहेण व्यवहारो
पपत्तिरिति वाच्यं। बाधकाभावात्। अन्यथा विपरीतस्यैव वक्तुं सुकरत्वात्। न च प्रवृत्तिरूपव्यवहार
स्य व्युत्पत्तौ प्रयोजकत्वं लाघवेन व्यवहारमात्रस्य तथात्वात्। सिद्धार्थात् व्युत्पत्तिविरहे प्यन्यस्य व्युत्प
न्नस्य तस्मादन्यत्रैव बाधकाभावात्। तस्मात् सिद्धार्थस्यानुभावकता नास्तीति वदतो गुरोरपि लघुत्वमि
ति॥ ॥११॥ ॥अचिन्त्यशक्तिरित्यपि विचारणीयं। तत्र परेषामयमाशयः। तत्तदर्थान्वयबोधजनकत्वं
तावत् तत्तत्पदकदंबके तिष्ठ प्रसिद्धं। तत्रान्वयबोधजनकत्वं तु वैस्य नियामकं विना न संभवति। ३०
नियामकत्वं च पश्वादिशक्तेः वति च द्वितीये गौरवप्रसंगात्। पदानामेवोपजीव्यत्वेन चर्यां शेपि शक्तिः
स्वीक्रियतां। तदिदमनुपपन्नं। प्राथम्यादनिश्चयाच्चात्पर्योपगमादपि पदानामेव सा शक्तिरेवैरमस्तु

बंध १ वत्ता २ त्रि १

बलहणं संमवधारयतितरस्त्वाव्युत्पित्सुः। सिद्धार्थस्यसाध्यतोपरागाविरहात् कथं तदधीनव्युत्पत्यग्रहः। अ
नुभावकत्वे आकांक्षादिवत्साध्यतोपरागस्यापि प्रयोजकज्ञानोपलयना तत्र च वक्तृज्ञाविलंबो न तत्कार
णत्वावधारणं व्युत्पद्यते बाल इति युक्तं। न च पुत्रस्ते जात इति सिद्धार्थादपि हर्षप्रयुक्तमुखप्रसाददर्शना
त् हर्षस्य तान साध्यत्वात्तत्रापि शब्दस्य च हेतुत्वमिति वाच्यं। हर्षोद्धेतूनामानंत्येन सुखजन्यज्ञानसाध्यत्व हे ३
प्रसिद्धेः। न च वस्तुरसमात्रफलमिति वाक्यश्रवणानंतरं तत्र प्रवृत्तिदर्शनात्। ततो नु न च कल्पने व्युत्पत्ति
स्य ६ ग्रहसंभव इति वाच्यं। यतः साध्यार्थस्थलेष्वपि साध्योपरागप्रयोजकत्वव्यवस्थितो तत्रापि तदभावात् हे
त्येव प्रवर्तत इति युक्तं। तदिदमुच्यते। कार्यपराणामन्विते शक्तिरिति॥ ॥अत्रोच्यते॥ ॥हर्षहेतूनी
मानंत्यादित्रिने न ज्ञानव्यतिरेकेणैव तत्र हर्ष उत्पद्यत इति वाच्यं। प्रमाणांतरोपजातज्ञानाद्वा
ननावदाद्यः। हर्षस्य सुखरूपतया तस्य च ज्ञानकारणत्व व्यवस्थितौ तदंतरेण तदुत्पत्तेरसंभावा
त्। अन्यथा प्रवृत्त्यंतरपि ज्ञानांतरपदप्रकल्पनाप्रसंगात्। न द्वितीयः। वाक्यादन्यस्य प्रमाणस्य
तत्र कल्पनीयत्वात्। वाक्यकारणत्वस्यैव युक्तत्वात्। अन्यथा गामानयेत्यादावपि प्रमाणांतर

प्राधान्येन प्रतियोगिन उपसर्जनत्वेन प्रतीतिप्रसङ्गात् न वा तथा। किन्तु अन्वयस्योपसर्जनतया प्रतियो
गिनः प्राधान्यतया ज्ञानमिति। संसर्गो वा वाक्यार्थो नास्त्येव प्रकारप्रकारिभावमात्रं तु परिशिष्यते इति चे
न्न शक्तिः। न च व्यक्तिप्रतिबन्दी तत्र विशेषस्यैकत्वादिति। ननु संसर्गस्य विशेषणत्वे पूर्ववत् तज्ज्ञानमा
यातमिति यदि कुर्यां प्रज्ञातामिति चेत् ज्ञानयावद्विशेषणज्ञानजन्यत्वानङ्गीकारात्। यद्वा संसर्गस्यैव प्रा
धान्येन प्रतियोगिनो विशेषणत्वेन ज्ञानमस्तु तावतापि नान्वितानभिधानसिद्धिः। संसर्गविशेष
णतयाकथं ज्ञानमिति चेत् न। नासिद्धेः किञ्च येस्तत्प्रमाणान्तरेण। यद्वा पदार्थान्तरेणेति संक्षेपः॥१०
॥ १२॥ ॥ वायुः प्रत्यक्ष इत्येके। तेषामयमाशयः। त्वगिन्द्रियव्यापारानन्तरं वायुर्वातीति प्रतीतिः
सकलजनसिद्धा। न च स्पर्शादिलिङ्गजन्या व्याप्त्यादिप्रतिसन्धानविरहेऽपि जायमानत्वात्। अन्यथा
त्वगिन्द्रियव्यापारानन्तरं जायमानघटप्रतीतेः साक्षात्कारित्वे का प्रत्याशा। तत्रापि स्पर्शादिलिङ्गकत्व
स्य वक्तुं सुकरत्वात्। ननु बहिरिन्द्रियजन्यसाक्षात्कारविषयत्वावच्छेदकं उद्भूतरूपवत्त्वं सति महत्त्वे
तच्च वायौ नास्तीति कथं प्रत्यक्षत्वं च गिन्द्रियव्यापारस्य स्पर्शादिलिङ्गप्रतीतावन्यथासिद्धः धूमव

पगम्यतां॥ किंच। अन्वयस्य शाक्ये चेत्क्रियामात्राविषयानेकर्मविशेषजिज्ञासा संभवति। नवान्वयस्यापि
मात्राविषये न क्रियाविशेषजिज्ञासा वा कथं स्यात्। न हि सामान्या प्रतीतौ ॥९॥ शक्यत्वे यत्किंचित्पदेनान्वय
बाधकचोपपत्तौ पदांतरप्रयोगवैफल्यमिति। प्रतियोगिविशेषोपपत्तौ तदुपयोगादिति॥ ॥अत्रोच्यते।
घटादिपदानामितरान्वितत्वाशक्तिः। आनयनादिविशेषतरान्वितत्वानाद्यः। कारकक्रियासमभिव्या
हृतवाक्यात् कारकान्विताक्रियाक्रियान्वितं कारकमिति प्रतिपत्तिप्रसङ्गात्। तथा चवाक्यभेदो विशे
षाप्रतिपत्तिश्च स्यात्। आकांक्षादिमत्त्वसमभिव्याहारविशेषाद्विशेषलाभ इति चेत्। तर्हि तस्मादन्वय
लाभोपपत्तौ तत्र शक्तिकल्पनायामन्याय्यत्वात् तदिदमुक्तं। अन्वयस्यान्यथा प्राप्तेरन्यथानुपप
त्तितः। अनन्यलभ्य मात्रार्थशक्तान्येव पदानि न इति। न द्वितीयः। वाक्यार्थघटमित्यनेनैव बोधितत्वादा
नयनादिपदप्रयोगवैफल्यप्रसङ्गात्। न च विशेषजिज्ञासान्यथानुपपत्त्याऽन्वयशक्तिकल्पनं युक्तं। अ
न्वयमात्रस्य व्याप्तिबलेन प्राप्तौ तद्विशेषजिज्ञासापाऽन्यथोपपत्तेः। अन्यथा वक्तुः परिदृष्टेऽपि बीरादौ
रसविशेषजिज्ञासा बालनरसमात्रं वक्तुर्ग्राह्यं स्यात्। न च पदानां पदार्थानामन्वयपरशक्तिः। अन्वयस्य

वायुः प्रत्यक्षः महत्त्वे सत्युद्भूतस्पर्शवत्त्वात्। पटवत्। न चोष्मादिना व्यभिचारः तत्र साध्यविरहस्या
सिद्धेः। न चोद्भूतरूपवत्त्वमुपाधिः रूपादावेव साध्याव्यापकत्वात्। न च द्रव्यत्वरूपपक्षधर्मावच्छिन्न
साध्यव्यापकरूपवत्त्वमेवोपाधिः आत्मनि साध्याव्यापकत्वादिति॥ ॥अत्रोच्यते॥ ॥बहिरिन्द्रि
यजन्यद्रव्यसाक्षात्कारविषयतावच्छेदकं किञ्चिद्वाच्यम् अन्यथा द्रव्यमात्रस्य तथा साक्षात्कार
विषयतापत्तेः। न च तथा द्रव्यसाक्षात्कारविषयतायाः साक्षात्कारविषयतादीनां नानुगतं निया
मकं तथात्रापि। क्वचिदुद्भूतरूपवत्त्वे सति महत्त्वं। क्वचिदुद्भूतस्पर्शवत्त्वे सति महत्त्वमेवत्र विष्य
तीति वाच्यं। यतो विनिगमनाविरहादुभयोरपि प्रयोजकत्वेऽपि वायोः प्रत्यक्षत्वानसिद्ध्यति। यो
ग्यानेकविशेषगुणवत्त्वं द्रव्यसाक्षात्कारमात्रे प्रयोजकमिति केचित्। तच्चिन्त्यं। किं च। अन्यत्रा
नुगतनियामकाभावात् तथा च मन्त्रानुगतस्य रूपविशेषवत्त्वे सति महत्त्वस्य वाह्यसाक्षा
त्कारत्वे द्रव्यस्य योग्यतावच्छेदकत्वमवश्यं स्वीकर्तव्यं तस्य च बहिरिन्द्रियजन्यद्रव्यसाक्षात्कारयो

तीतौ च द्रव्यत्वव्याप्याद्दिप्रतिसंधानविरहेण ज्ञायमानत्वमसिद्धमिति। मैवं। उद्भूतरूपवत्त्वे सति महत्त्वस्य ब
हिरिंद्रियजद्रव्यसाक्षात्कारविषयत्वावच्छेदकत्वानुपपत्तेः उद्भूतस्पर्शवत्त्वे सति महत्त्वस्यैव तत्रा
वच्छेदकत्वेन वैवमृष्यादेः स्पार्शनापत्तिर्दोषाय। इष्टापत्तेः। नन्वेवं मनआदेर्बहिरिंद्रियजद्रव्यसाक्षात्का
रविषयत्वानुपपत्तिः तत्र तथाभूतसाक्षात्कारविषयत्वासिद्धेः। एवं हि तत्रापि वक्तुं शक्यते बहिर्द्रव्या
पारोरूपमतीतावेवान्यथासिद्धेः मनआदिप्रतीतिस्तु लिङ्गजन्येति किं वनदेवचं किमिति नाड्
कुरुषायत्र द्रव्यसाक्षात्कारविषयमात्रावच्छेदकमेवोद्भूतरूपत्वे सति महत्त्वं अलं बहिरिंद्रियज
विशेषणग्रहणा एवं सत्त्वात्माप्रत्यक्षोत्स्यादिति चेत्। मानवत्त्वा। सोपि ज्ञानादिनानुमीयतां तस्मात्
स्वीकुरुत्वाद्योः प्रत्यक्षत्वं परिहरवा आत्मानः प्रत्यक्षत्वमिति दुरुत्तरा प्रतिबंदिनरक्षोणी। नत्वद्रव्य
ग्रहणयोग्यताव्यापकयोग्यतानां संख्यापरिमाणादीनां प्रत्यक्षताप्रसङ्गो बाधक इति वाच्यं कर
उद्भूतवायोः संख्यादीनां प्रत्यक्षत्वेनेष्टापत्तेः एतेन प्रत्यक्षतासाधकमनुमानमप्युक्तम्। ४

शीतआसीत्। स एवेदानीमुष्णो वातीति प्रत्यभिज्ञानं केन समाधेयमिति वाच्यं तथैव प्रत्यभिज्ञानस्य पूर्वादि
दिक्प्रत्यवच्छिन्नवायूपाधिभेदेनान्यथासिद्धेः। उपाधिग्रहव्यतिरेकेण तथा प्रत्यभिज्ञानस्यासिद्धेः तस्मान्न
दिक्प्रत्यवच्छेदको धर्मः प्रत्यभिज्ञाने न विषयीक्रियत इति अतो धर्मो नाश एव प्रत्यभिज्ञानस्यासिद्धेः
वायोस्त्वगिन्द्रियाग्राह्यत्वे शीतो वायुरिति त्वगिन्द्रियजो भ्रमः कथं स्यात् विशेष्ययोग्यतामादायैवे
न्द्रियाणां प्रवृत्तेरिति चेत्। न। धर्मांशे विशेष्ययोग्यतापेक्षणेऽभ्रमस्य ज्ञानान्तरोपपत्तेः विशेष्य
दर्शनात्। मानसोऽयं भ्रम इत्यन्ये स्पर्शविशेष्यक इत्यपरे एवं बाधाप्रत्यक्षता साधकानुमानम
पि तावत्तरति। वायुरतीन्द्रियः। आत्मभिन्नत्वे सति सनीरूपद्रव्यत्वात्। आकाशवदिति वायुः पृ
थिव्यादिभिन्नत्वेनायायदि प्रत्यक्षतो न सिद्धस्तदा तद्भिन्नत्वेनासिद्धेरेवेति चेन्न। न वायोः प्रत्य
क्षत्वेपि इतरभेदांशे प्रत्यक्षस्योदासीनत्वादिति संक्षेपः॥ ॥१३॥ ॥निर्विकल्पकेनावच्छिन्नप्रपत्ति
त्तिः। ज्ञानत्वं निःप्रकारकवृत्ति न वा। यद्वा ज्ञानत्वं निष्प्रकारत्वसमानाधिकरणं न वा। एवं सति निर्विक

३२

ग्यतावच्छेदकस्य सत्त्वात्कथं बाधकं विना तत्परित्यागः यत्तु न रूपं त्वगिन्द्रियजन्यसाक्षात्कारे
यदेव योग्यतावच्छेदकं क्लृप्तं। तादृशबहिरिन्द्रियजन्यसाक्षात्कारत्वक्लृप्ते स्पर्शत्वे सति महत्त्व
मेव नियामकमस्तु। अनादिप्रतीतिस्तु लिङ्गजन्यदर्शनविषयतीति तदसङ्गतं तथा हि रूपविशे
षात्प्रभाप्रतीति सत्त्वेपि तद्धर्मसंयोगादिप्रतीतिरुन्मीलितनयनस्य केन लिङ्गेन स्यात्। अ
नादीनामप्रत्यक्षत्वे तद्गतधर्मग्रहे न कोप्युपायः। न च संयोगादिगोचरथाभूतसाक्षात्कार
नियामकरूपविशेषवत्त्वे सति महत्त्वं चेद्रूपगोचरे तु तथाभूतसाक्षात्कारस्य स्पर्शवत्त्वे सति
महत्त्वमेव नियामकं इति वाच्यं। गौरवप्रसङ्गात् तस्मादुद्भूतरूपवत्त्वे सति महत्त्वमेव निया
मकमिति कथं न उक्तं हि तस्य वायोः प्रत्यक्षत्वसत्त्वे ना प्रतिबद्धितरङ्गिणी संतरणोपायस्तु प्र
त्यभिज्ञाविशेषनरिरवत्तथा ह्यात्मनो ज्ञानादिलिङ्गानुमेयत्वे योऽहं चक्षुषा घटमद्राक्षं सोऽहं
त्वचा स्पृशामीति प्रत्यभिज्ञानं केन लिङ्गेन स्यात्। न च व्यापारतोन्द्रियत्वे य एव वातः प्राचीनैः

त्यादिना पूर्वं समान्यतो ज्ञातमेवानन्तु व्यवहारक्षमवद्यं सकलजनसाधारणः। परममतत्रसविकल्पकं नद्
त्तं किन्तु निर्विकल्पकमेव तथा चैतत्व्यवहारानुरोधेनावश्यं निर्विकल्पकं स्वीकर्त्तव्यमिति। मेवं। ममतत्र
निर्विकल्पकं चत्रामिति व्यवहारस्य संसृष्टसविकल्पकगोचरत्वात्। निर्विकल्पकस्यातीन्द्रियत्वात्व्य
पगमाद्बु नवज्ञानत्वं निष्प्रकारकत्वसमानाधिकरणं सकलज्ञानवृत्ति चात्रसतावदिति वाच्यं ज्ञानाति
रिक्तवृत्तित्वस्योपाधित्वात्। अप्रयोजकत्वाच्च। न च चक्षुः श्वादकुषसविकल्पकातिरिक्तज्ञानजनकं ज्ञा
नजनकत्वात्। घ्राणवदिति निर्विकल्पकसिद्धिरिति वाच्यं। अतीन्द्रियातज्ञोत्पिन्नत्वस्योपाधित्वात्।
एवंविधानुमानानामतिप्रसंजकतया उपेक्षणीयत्वाच्चेति पूर्वपक्षसंक्षेपः।। ।।अत्रोच्यते।। । ३४
जागराद्यज्ञानं स्मरणरूपमनुभवरूपं वा। तन्न यथापि निर्विकल्पकसिद्धिः। तथाहि। स्मरणपदो
नजनकसंस्कारस्योद्बोधः सहकारी। स च ज्ञानरूप एवेति जागराद्यस्मरणाव्यवहितप्राक्कालीनं निर्वि
कल्पकमायातं। अनुभवत्वपक्षे सुषुप्तिप्राक्कालीनविशेषणज्ञानस्य संस्कारद्वारा जनकत्वेपि संस्कारो

ल्पके प्रमाणमाहुः जागराद्यसविकल्पकं जन्यविशेषणज्ञानजन्यं जन्यविशिष्टज्ञानत्वात् दण्डीपुरुष इति
ज्ञानवदिति। अत्र पक्षधर्मताबलात् प्रकारकं विशेषणाविषयकं जागराद्यज्ञानाव्यवहितपूर्वसमयव
र्तिज्ञानं सिध्यति। सप्रकारत्वं चैकविशेषणान्यविषयत्वं च पक्षधर्मताविरोधात्। सप्रकारकत्वे हि तदे
वजागराद्यसविकल्पकं स्यात्। न तु पक्षीकृतं ज्ञानमिति पक्षतावच्छेदकधर्मविरोध इति। ननु सुषुप्तिप्रा
क्कालीनसविकल्पकेनैव विशेषणविषयकेन संस्कारद्वारा सिद्धसाधनं। संस्कारद्वारापि विशेषणज्ञा
नस्य विशिष्टज्ञानजनकत्वं दृष्टमेव। यथाव्यवहितस्य अनुभवस्य स्मरणं प्रति। न च जागराद्यनुभ
वस्य हि परत्वं अनुभवस्य वा व्यवहितपूर्ववर्तिविशेषणज्ञानजन्यत्वनियमान्न सिद्धसाधनमिति
वाच्यं अप्रयोजकत्वात्। अनुभवत्वं वा जागराद्यज्ञानस्यासिद्धं स्मरणमेव जागराद्यज्ञानं तच्च व्यवहितेना
पि विशेषणज्ञानेन जन्यत इति किमिति निर्विकल्पककल्पनं ननु प्रत्यग्रोत्पन्नविशेषणविशिष्टघटसवि
कल्पकं पक्षीकृत्य निर्विकल्पकसाधनमिति युक्तं प्रत्यग्रोत्पन्नमपि विशेषणांशरूपादिकमेव तदपि वरूप

वायस्यापिविशेषणत्वात्अघटवत्भूतलमित्यादावभावस्यापिविशेषणत्वात्।विशेषणज्ञानंचेन्नवनिर्वि
कल्पकत्वंकल्पनात्।एवंविशेषणत्वाविशेषेपिरूपत्वादिकंनिर्विकल्पविषयः।ननुसमवायाभावावि
तिनकश्चिन्नित्यात्मकं।वैपरीत्यस्यापिस्तुवचनात्नचैवरूपसमवायवान्घटइत्यत्रसमवायोवि
शेषणंसमवायेवरूपमेवनिर्विकल्पकेनविषयीक्रियातआनंतरंरूपविशेषणकंसमवायवि
शेष्यकंसविकल्पकमनंतरंरूपवान्घटइतिप्रतीतिरित्येतावतैवोपपत्तौसमवायादेर्निर्विकल्प
कविषयतायांकल्पनायांकल्पनागौरवेस्मितिवाच्यं।एवंरूपमपिनिर्विकल्पकविषयोनस्यात्।त
त्रापिरूपत्वंविशेषणंतदेवनिर्निर्विकल्पकेनविषयीक्रियतइत्यस्यस्तुवचनत्वात्।नचजातिज्ञानं
व्यक्तिविषयतानियतमितिकृत्वातत्रव्यक्तिर्भासतइतिवाच्यं।समवायस्यापिज्ञानप्रसङ्गात्।रूपि
त्वज्ञानंचस्यसमवायविषयतानियतत्वात्।नचैतादृशंज्ञानंयत्रसमवायोनभासते।एवंप्रयोगः
समवायाभावेननिर्विकल्पकविषयोऽस्मदादिसाक्षात्कारविषयत्वात्रूपादिवत्।नतावद्द्रव्यत्वे

बोधरूपत्वेनानिर्विकल्पकमेव स्वयं वाच्यं। तथा च ल- घात्तदेव विशेषण।विषयतया विशिष्टज्ञानजनकमङ्गी
क्रियतामलं संस्कारद्वारा व्यवहितज्ञानजनककल्पनया। किञ्च विशिष्टज्ञानत्वं अव्यवहितविशेषण
ज्ञानजन्यतानियतमिति व्याप्तिरपि रक्षिता स्यात्। यद्वा प्रत्यक्षासन्नविशेषणविशिष्टविषयकस
विकल्पकं पक्षीकृत्य निर्विकल्पकसाधसाधनं युक्तं। न च सामान्यलक्षणया प्रत्यासत्त्या रूपादि
सविकल्पकेनैव सिद्धसाधनमिति वाच्यं। अनेन नहि रूपवान् पट इति प्रतीतिः स्यात्तानन्वेतद्रूप
वानिति सविकल्पके करूपं हि विशेषतज्ञाने पेरूपेण विशेषणमुल्लिखति। तेनैव रूपेण विशिष्टज्ञा
नेविशेषणज्ञानमिति नियमः। अन्यथा घटत्वेन रूपज्ञानाद्रूपवान् घट इति प्रतीतिप्रसङ्गात्।
न च निर्विकल्पकेप्येवं प्रसङ्ग इति वाच्यं। तस्य नदर्शमवकल्पनायां धर्मिग्राहकप्रमाणविरोधात्।
एवं सामग्रीवशात् रूपज्ञानान्तरेपि निर्विकल्पकमूहनीयमिति किमनुपपन्नं। ननु तथापि समवाया
नावयोः कथं सविकल्पके काव घना। तथा हि रूपसमवायवान् घट इत्यादौ सविकल्पके सम

अपरे तु अप्रौढ्यसिद्धसाधनादिभियात्रैव ज्वरं कुर्वाणाः समवायादेरपि निर्विकल्पकविषयत्वमाहुः।
अत एव निर्विकल्पकल्पकविषयत्वमेवार्थस्य लक्षणं स्वीचक्रिरे न तु असंगतमेतत्। विशिष्टस्य ज्ञा
नस्य विशेषणज्ञानजन्यत्वे प्रमाणाभावात्। तथाहि दंडी पुरुष इत्यत्र प्रथमं दंडज्ञानमनंतरं
तद्विशिष्टपुरुषज्ञानं तत्र न किंचित्प्रमाणं। न च कारणीभूतज्ञानविषयत्वे सति कार्यीभूतज्ञान
विषयत्वं विशेषणत्वमिति वाच्यं। वैपरीत्यस्यापि सुवचत्वादिति। न चानुमितौ व्यापकत्वादि
विशेषणज्ञानस्य जनकत्वदर्शनादन्यत्रापि विशिष्टज्ञाने विशेषणज्ञानस्य जनकत्वं कल्पनी
यमिति वाच्यं। तद्दृष्टांतेन विशेष्यज्ञानस्यापि विशिष्टज्ञानजनकताकल्पनाप्रसंगात्। पर्वतादिके २६
हि पक्षीकृत्यैतमनुमितौ विशेष्यं। तज्ज्ञानवत्त्वं जनकमेवेति। मैवं। अगृहीतदंडस्य दंडी पुरुष इति
प्रत्ययानुदयदर्शनेनान्वयव्यतिरेकाभ्यामेव विशेषणज्ञानस्य विशिष्टज्ञानकारणत्वावधार
णादिति संक्षेपः॥ ॥१४॥ ॥सुवर्णस्य तैजसत्वे किं मानं। सुवर्णं तैजसं संऽत्यंतानलसंयोगे सत्य

अवच्छेदयद्ध्रौव्यादध्रौव्येसिद्धसाधनात्॥

दकग्रहध्रौव्यात्सविकल्पकैकवेद्यताज्ञानेछासंयोगादीनामपिसविकल्पकैकवेद्यताप्रसङ्गात्।तत्रा
पिविषयसंयोगिनोरवच्छेदकयोर्ग्रहध्रौव्यस्यविद्यमानत्वात्।मैवं।विशिष्टसाक्षात्कारान्यथा
नुपपत्त्याहिविशेषणज्ञानत्वेननिर्विकल्पककल्पनेसमवायेवान्यथोपपत्तेर्दर्शनात्।किमिति
तद्विषयत्वमपिनिर्विकल्पकस्यस्वीकर्त्तव्यंतथाहिजात्यादिकंतावन्निर्विकल्पकेनविषयीक्रिय
ते।अनंतरमिदंरूपमितिसविकल्पकंतद्विशेषितसमवायविशेष्यकज्ञानोदयः।अनंतरंतेनसम
वायिविशेष्यकमिदंरूपमयंघटोरूपवानित्यादयःप्रत्ययाजायंते।एवमन्तावपिप्रथममन्त्रा
वाविशेष्यकएवप्रत्ययोजायते।अनंतरंतेनतद्विशेषणकप्रत्ययोजन्यतइति।संयोगज्ञानादौ
तुनरवच्छेदकग्रहध्रौव्यापिसंयोगत्वज्ञानत्वनिर्विकल्पकविलंबेनतद्विशिष्टप्रत्ययविलंबः।तथा
चसविकल्पकैकवेद्यता।अन्यत्र।संयोगादेरपिसविकल्पकैकवेद्यत्वेवानवसंयोगत्वादिनिर्वि
कापेक्षाविलंबःयावद्विशेषणज्ञानस्यगौरवभयेनविशिष्टप्रत्ययजनकत्वानभ्युपगमादित्याकूतं।

ह्रादिना व्यभिचारस्य दुःपरिहरत्वात्। तथाविधानलसंयोगे सत्यनुच्छिद्यमानद्रव्याधिकरणत्वं हेतु
रितिचेत्। न। तेजसि च साध्ये पूर्वदोषानतिवृत्तेः। अनेन हेतुना पृथिवीव्यतिरेकं जलादिव्यतिरे
कं वा चीतस्याशीघ्रनधिकरणत्वेन प्रसाध्य एतदुभयभिन्नत्वे सति रूपवत्त्वात् तेजस्त्वसाधनमि
ति चेत्। न। अत्र पक्षेऽन्तकेन व्यभिचारात्। पृथिवीत्वव्यतिरेकस्य साधयितुमशक्यत्वात्। न च जलव्य
तिरेकं सिद्धं कोवारयिता। तथा च तेजस्त्वमपि न स्यात्। नैमित्तिकद्रवत्वान्न जलमिति चेत्। न। ततए
५ साधनं युक्तं हेतोरसिद्धत्वात्। योग्यानुपलब्ध्या शीतस्पर्शव्यतिरेकासिद्धिरिति यदि तदा तथैवोष्ण
स्पर्शादिव्यतिरेक×पशाद्यु॥ वतेजोव्यतिरेकसिद्धिसंभवात्। अन्ततः। पृथिवीत्वमेवानेन साधयितुं २७
शक्यते। वागीश्वरस्तु स्वर्णमपार्थिवं तथाविधानलसंयोगे सति तस्मान्नारंजकत्वादित्याह तद
पि तुच्छं। घटेन व्यभिचारात्। कृतत्वेन विशेषणीयमिति चेत्। न। लाक्षादिना व्यभिचारात्। न ह्यने

नुच्छिद्यमानरूपाधिकरणत्वात्। सौरालोकवदिति चेत्। न स्तु वर्णपदेन हि किं पदैकत्वेनाभिमतं। अत्यंताग्निसं
योगे सति अनुच्छिद्यमानरूपाधिकरणमिति चेत्। न। तस्यापि सौरालोकादिव्याप्तत्वस्यासिद्धेः तत्र वसि
द्धसाधनात्। उपष्टंभकसाक्षरत्वेन तत्र बाधात्। उपष्टंभकसौरालोकादिव्यतिरिक्तपक्षतावच्छेद
कस्याभावात्। किंवानुच्छिद्यमानरूपाधिकरणत्वं विवक्षितं। अत्यंतानलसंयोगाविनाश्यरूपा
धिकरणत्वं वा। तस्मिन्सत्यपरावर्त्तमानरूपाधिकरणत्वं वा। नाद्यः। स्वरूपासिद्धत्वात्। तथा हि मू
र्त्तानिहितस्य स्वर्णस्य तथाविधानलसंयोगे सति स्वरूपमेव नानुवर्त्तते। किं पुना रूपं न द्वितीयः। उ
लेन व्यभिचारात्। उपष्टंभकाभिमते न गत्वाद्यु। नैमित्तिकद्रवत्वाधिकरणत्वादित्युरिति चेत्। अन्व
यित्वे सहचाराभावात्। व्यतिरेके च व्यपते विरोधात्। तेजोवेष्टनमित्यागमाबलात्। घतैतेजसमेवेति
न विरोध इति चेत्। न तथा सति व्यतिरेकित्वाभावात्। तत्तैजसत्वस्य च निशङ्करिष्यमाणत्वात्। ला

किं३

ल्पयितुमुद्यतोसि। व्यवस्थापकमपि कल्पनीयमिति चेत् नूनमतिप्रज्ञोसि यस्त्वन्क्रूमव्यवस्थापकं जल
त्वं परिहरसि कल्पनीयव्यवस्थापकं तेजस्त्वं न परिहरसि। अभास्वरत्वंस्तुवर्णरूपस्यासिद्धमिति चेत्
तन्न महांधकारोद्भेन स्तुवत्सेन घटादिभिर्केकाश्यत इत्यपि वक्तुमध्यवसितोसि मिति कडूवत्वं जलत्वबा
धकमिति चेत् तत् किमेतदेव न तेजसत्वबाधकं। येन लंकामहायज्ञुनः पुरैनेत्रिध सेस्वेदशीतस्प
र्शविरहाज्जलत्वविरह इति चेत्। न तयोरनुद्भूतत्वेनाप्युपपत्तेरिति॥ ॥अत्रोच्यते॥ ॥यत्तावदु
क्तं पृथिवीतरद्रवत्वाश्रयत्वेन न दाहविरोधित्वं किंतु जलत्वेन लाघवात्। तदनुपपन्नं। सिलासं
बंधस्यापि जलस्यापि जलस्यादाहप्रतिपक्षत्वप्रसंगात्। तथापि सांसिद्धिकद्रवत्वाश्रयत्वेनैव दा
हप्रतिबंधकत्वमास्तामिति चेत्। न। प्रकृतेपि सांसिद्धिकद्रवत्वाश्रयत्वस्य बाधात्। तर्हि जलव्यतिरिक्ते
स्य द्रवत्वाश्रयस्य दाहप्रतिपक्षत्वाभावात् जलस्य तद्बाधात् दाहप्रतिपक्ष एव न सिद्ध्येदिति चेत्। न तथा
सति दाहप्रसंगात्। दाहप्रसंजकेन करकावदुपवष्टंभकान्तिमतपीतिमगुरुत्वाश्रयेण। प्रतिबद्धद्रव

३८

नात्यंतानलसंयोगेन तस्मात्स्यते किंतु तद्विनाशे सति द्व्यणुकादिप्रक्रमेण तत्र तस्मोत्पद्यते। अन्यथा
तस्मिन्निजत्वापत्तेः। उपष्टंभकेन तद्व्यतिवाराद्यनलत्वेति विरमनलसंयोगे पीतिमगुरुत्वविशिष्टमुपष्टं
भकाभिमतपार्थिवं द्रवीभावेप्यतस्मी भूतमनुभूयते। अतस्तत्रापि पार्थिवद्रवत्वाधिकरणं दाहप्रति
पदभूतमनुमेयं क्षीरादेरतितरां क्वथ्यमानस्य जलनिर्हिमस्य दाहप्रतिबंधकत्वदर्शनात्। तथाच
यदेवापरावर्तमानरूपं द्रवीभूतं भूषांतर्वर्ति प्रतीयते। तदेवापार्थिवं कल्पतां। पार्थिवत्वे दाहप्रतिप
क्षता विरोधात्। तद्वस्नेहादिविरहितया जलं न भवति। वाय्वादिकं तु तस्य रूपवत्वादेवानुपपन्नं ते
थाच परिशेषादेतस्य तैजसत्वमिति। अस्तु तावदापातरम्यमेतत्तथापि येन रूपेण दाहप्रतिबंधका
ता दृष्टा तद्रूपविशिष्टमेव कल्पयितुमुचितं। सा च ना पार्थिवत्वे सति द्रवत्वेन। किंतु जलत्वेनैव ला
घवात् जलत्वे व्यवस्थापकबाधात्तदभाव इति यदिब्रूषे तदपि मंदं। अनास्वरापाकजरूपस्य तद्व्य
वस्थापकस्य प्रत्यक्षसिद्धत्वात्। किंच। किमत्र तेजस्त्वे व्यवस्थापकमुपलब्धवान् न भावात्। येन तेजस्त्वं क

वादिमूलपरमाणूनां तस्य द्व्यणुकारंभकत्वं। ननु तथैतन्मूलपरमाणूनां तस्य द्व्यणुकारंभकत्वं विव
क्षितं। तत्र पार्थिवा। विशेष एव तस्मान्नारंभकत्वं कल्पनीयम् इति तौ द्वियः पद्यो युक्तः। द्रवत्वाधिकरणस्य
पार्थिवस्य तथानलसंयोगे सति तस्मारंभकत्वनियमात् तत्र बाधकाभावात् न संकोचस्यान्याय्यत्वा
त् नैमित्तिकद्रवत्वाश्रयत्वस्य तस्मारंभकत्वव्याप्यत्वावच्छेदकत्वात् पृथिवीत्वस्यैव। किंच। पार्थिव
त्वकल्पनायां रूपमप्यपरावर्त्तिमानमनुपपन्नं रूपरावृत्तौ पृथिवीत्वस्यैव तत्रत्वात्। ननु नैमित्ति
कद्रवत्वस्य पृथिवीत्वनियतस्य कथमपृथिव्यामुत्पत्तिः। तथात्वे वाय्वादावप्युपपत्तिप्रसंगात् इति
प्रवत्वनियमाकमिति चेत्। न हि जले तदुत्पत्तिप्रसंगः स्वाभाविकद्रवत्वविरहस्तत्र इति चेत्। तर्ह्यो ३९
लोकेपि तदुत्पत्तिप्रसंगप्रयोजकाभावान्नोत्पद्यत इति चेत्। तादव पृथिवीव्यतिरिक्ते नास्तीति ब्रूमः। तथा
चानैमित्तिकद्रवत्वमेव। तेजसत्वे बाधकमिति। मैवं। न हि पृथिवीत्वाभावे नैमित्तिकद्रवत्वसमवायिका
रणतावच्छेदकपृथिवीमात्रे तदुत्पत्तिप्रसंगात्। नापि घटत्वादिकं। परस्परव्यभिचारात्। तस्माद्द

वं जलमेवा तद्धि सिद्धत्वनुपष्टंभकस्यैव वातस्यास्वतावः कल्पतां येन तथा पार्थिवत्वेपि न दाह इति चेन्न ।
न प्रथमे कल्पना गौरवात् । तथा हि तेजस पक्षे नैमित्तिकं द्रवत्वं । अनुद्भूतस्पर्शवत्वं परप्रकाश
ताविरोध्यनुपष्टंभकसंबंधश्च अतत्र पक्षेव कल्पनीयं जलत्वे त्वनुद्भूतस्पर्शवत्वं अनुद्भूतस्नेहव
त्वं सांसिद्धिकद्रवत्वग्रहाविरोध्यनुपष्टंभकसंबंधः । उद्भूतरूपत्वे सति जलस्यानुद्भूतस्पर्शवत्वं श्च
त्याद्यदृष्ट्वा । तैजसत्वे तु नादृष्टवर कल्पना । उद्भूतरूपानुद्भूतस्पर्शवत्वस्य प्रभादेः क्लृप्तत्वात् । व
ह्नेरपत्यं प्रथमं हिरण्यमित्यागमसंवादोपि तैजसत्वे । न चैवं तेजो वै घृतमित्यादिवाक्यात् घृतस्या
पि तैजसत्वप्रसङ्गः । अक्ताः शर्करा जुहोतीत्यत्राक्तत्वस्य द्रवद्रव्यमात्रसाध्यत्वात् । द्रवद्रव्यमा
त्रेणाक्तत्वप्रसक्तेरन्यस्य व्यावृत्त्यर्थं सर्पिःस्तूयते तेजो वा एतद्यच्चित्रं घृतं न तैजसत्वे तात्पर्यं तद्व्यव
स्थापकबाधेन प्रथमं बाधितत्वात् । बाधितविषये शक्तौ तस्यास्पर्शकल्पनायामप्रामाण्यप्रसंगात् ।
स्मृतौ माषकादिव्यवहारस्तत्सुवर्णेपिष्टंभकगुरुत्वेनान्यथासिद्धः । तस्मान्नारंभकत्वं तु पथाको ।

यथा पृथिव्यात्मवेति न नियमः तथा नैमित्तिकद्रवत्वमपि किन्तु मलत्वादिसहकारिसत्त्वादन्यत्रापि न तदु
त्पत्तिसंभवः नादृष्टवारितात् तस्मात्प्रति परं तापि जलपरमाणावपि सम्भवात् तत्रापि नैमित्तिकद्रवत्वो
त्पत्तिर्न विरुद्धेति संक्षेपः॥ ॥१५॥ ॥पंकजादिपदानां योग एतस्येके रूढिरित्यपरे। योगरूढिरिति
गौतमीयाः तत्र केवलयोगवादिनामिदमाकूतं किमर्थं समुदाये शक्तिकल्पनं पद्मत्वप्रतीत्यर्थं वा॥
कुमुदाद्यप्रतीत्यर्थं वा। नाद्यः। संस्कारादवतदुपस्थितेः नव शाब्दबोधाकांक्षाशब्देनैव शाब्दप्रतीतिन्या
येन प्रकारान्तरोपस्थितस्य न शाब्दे तु नवेव न्यासः। अन्यथा पचतीत्यत्र कर्मत्वाकांक्षोपस्थितं कलायमा
दाय कलायं पचतीत्यन्वयबोधप्रसंगात्। अत एव पिधेहीत्यत्र द्वारादिपदमध्याहार्यं न च पोनार्थ
मितिस्वीकुर्वीतीति वाच्यं। रूपान्तरेण कलायमित्यजिज्ञासितस्य वास्यमपि माणे समानत्वात् न च तत्र
तथा तात्पर्यग्रहात् अन्वयानवबोध इति वाच्यं। तत्र तात्पर्यशंकायत्वात्। नापात्र लक्षणा युगपद्वृत्तिद्व
यविरोधात् नचाजहत्स्वार्था। शक्योपग्राहकस्य रूपस्यानुपस्थितेः नव शब्दसंबंधमनपेक्ष्य संस्का

४०

ष्टमेवमनुद्भूतमदृष्टमेव वा तत्र नियामकं वक्तव्यं। तच्च पृथिव्यामिवान्यत्रापि न दण्डवारितमिति ने पृथि
वीत्वव्याप्तं। ते निमित्तकद्रवत्वमिति न सत्प्रतिपक्षत्वमपि। न त्व — घृतत्वादिव्यापकः सामान्यविशेष एव
नैमित्तिकद्रवत्वाश्रयतावच्छेदकः। न च तथाविधसामान्यमप्रामाणिकमिति वाच्यं नैमित्तिकद्रवत्वाश्रय
स्यैव तत्र व्यवस्थापकत्वात्। गंधवस्यैव पृथिवीत्वे। पृथिवीत्वावान्तरसामान्यस्य परमाणुष्वसत्त्वा
त्तेषु नैमित्तिकद्रवत्वानुत्पत्तिप्रसंग इति चेत्। नास्य घृतत्वं न हि परमाणुद्रवत्वेन पार्थिवेऽवयविनि द्र
वत्वमुत्पद्यत इति काचित्सिद्धं वर्त्तते। तस्याद्व्यणुकादावेव नैमित्तिकद्रवत्वं वर्त्तते। तथा च घृतत्वादि
व्यापकपृथिवीत्वव्याप्यसामान्यविशेष एव नियामक इति कथं न पृथिवीत्वेन व्याप्तिरिति। मैवं। नै
मित्तिकद्रवत्वं तत्र क्वातिव्यवस्थापकमत्यापूत्यायोगव्यवच्छेदेन। यथा [illegible] काचत्वादिनैव परापरत्वावा
न्तरुपपत्तिनियाननैमित्तिकद्रवत्वमुत्पद्यते। अद्रवाणामपि काचादीनां विनादर्शनात्। तथा च का
चत्वादिनैव परापरत्वावान्तरुपपत्तिनियाननैमित्तिकद्रवत्वे व्यवस्थापकत्वाति सिद्धिरिति। तस्माद्द्रवत्वे
२४ गंधे पृथिवीतनवकाचादिषु सर्वत्र नैमित्तिकद्रवत्वमुत्पद्यते। अद्रवाणामपि काचादीनां विशददर्शनात्। तथा च २४ गोसु

यालिसावे पाने साविअंकडे ठिवेदुसरीये ईली पालीत २ तेथील देशो थाने पाने ...

रयप्रसंगात्। ननु घटमानयेति यथा वृद्धवाक्यात्प्रयोज्यप्रवृत्तिमुपलभमानो बालस्तस्य घटकर्मका
नयनानुकूलत्वमनुमिनोति। तत्रावापोद्वापक्रमेण घटत्वप्रकारकघटान्वयानुभवजनकत्वं घटपद
स्यावधारयति। एवमानयपदेऽपि तथा पंकजमानयेति वृद्धवाक्यादपि प्रयोज्यपदस्य पक्षे प्रवृत्त्युपल
म्भात् पद्मत्वप्रकारकपद्मान्वयबोधजनकत्वं पंकजपदस्यावधारयति। न च तत्प्रकारकतदन्वयानु
भवजनकत्वात् तत्प्रकारकतत्स्मरणजनकत्वाद्वा अन्यपदस्य शक्तिर्न नामेति। मैवं। न हि यद्विषयोनु
भवो येन पदेन जन्यते तत्र तस्यावश्यं शक्तिकल्पनं। संसर्गांशेऽपि शक्तिकल्पनप्रसंगात्। न चान्विताभि
धानवादिनो वेष्टापत्तिः अंशकत्वं गंगापदादेस्तीरत्वादिप्रकारकनीराद्यनुभवजनकत्वेन तत्र शक्तिप्रस
क्तौ लक्षणामात्रोच्छेदप्र[illegible]गात्। तत्प्रकारकतद्विषयज्ञानजनकत्वात्प्रसेति पिदवदत्तादिपदादेः सा बोध्य... एवं तु तस्मरणजनकत्वं
इत्यतिव्याप्तिं प्रति संक्षेपार्थोपस्थितेः सदर्शना सर्वत्र तत्तदर्थविषयकस्मृतिव्याप्तेरविशेषविषयत्वं तत्तस्य
दानांशकत्वं न च पदानुपस्थितस्यापि शाब्दसंसर्गावगमविषयत्वात् लक्षणोच्छेदप्रसंग इति वाच्यं। प्रकार
स्यान्यथोपस्थितस्यापि तन्नांगीकारात्। कथमन्यथा जलाहरणप्रस्तावे घटमानयेति च्छिद्रेतर घटत्वावच्छिन्नान्वयबो

पस्थितकलायेपिसमानत्वात्।अतएवपिधेहीत्यत्रार्थाध्याहार एवयुक्तोलाघवात्।पदाध्याहारेतदर्थान्वयतात्प
र्यकत्वस्योपजीव्यत्वात्।अतएवशाब्दान्वयबोधेसर्वेषांपदार्थानांपदोपस्थापितत्वंतत्रमितिनयुक्तिमत्।गौरवप्र
संगात्।नचशक्तिंविनासंस्कारादुपस्थितंशाब्दबोधेनियमेननभासत इतिनसोवतं।आकाशपदाशक्यस्यसं
स्कारादुपस्थितस्याका ... त्वस्याकाशदूत्वमितिशाब्दबोधेन्वयात्।नस्वीकारात्।अन्यथाआकाशपदान्नि
र्विकल्पकोदयप्रसंगात्।नापिद्वितीयः।तत्राशक्तेरेवतदप्रतीतेः।नहिघटपदादावपिपटाद्यप्रतिपत्त्यर्थंशक्तिक
नं।नचयोगस्यकुमुदादिसाधारणत्वात्तत्रापिप्रयोगप्रसंगइतिवाच्यं।योगपुरस्कारेणेष्टत्वात्।नहिपं
कजंशैवालमानयपंकजंकुमुदमानयेतिप्रयोगंकश्चिदपिबाध्यतयाव्यवहरति।अस्तुवाअवयवशक्तावे
वपद्मत्वमशक्यमेवप्रयोगोपाधिः।यथादृतिहरिपदेपशुत्वंयथावाधेनुपदेगोत्वंशक्त्युपाधिः।तत्रस
मुदायशक्तेरिवपद्मत्वस्मरणस्यवाकुमुदादिषुप्रयोगप्रतिबंधकत्वं।पंकपदोत्तरजशब्दस्यैववा।न
चप्रतिबंधात्कमलत्वोपस्थितिस्तत्रापिनस्यादितिवाच्यं।कापदर्शनेनकुमुदादावेवप्रतिबंधकल्प
नात्।एवमप्युपपत्तौशक्तिकल्पनेगौरवात्।अवयवशक्तावेवकोधंकल्प्यतां।नचघटपदादावपि
घटत्वादेःप्रयोगोपाधित्वशक्तौप्रकारेकचिदपिशक्तिर्नस्यादिति।वाच्यं।घटपदादनिर्विकल्पका

येव्युत्पन्नस्य कथमन्यथा पुत्रादिपादनपंकजपदस्य पर्यायकीर्त्तनवोषकारणो। प्रत्येकाव्युत्पन्नस्य
वाकर्थे पंकजशब्दात् पद्मप्रतीतिः न वान्वयप्रतियोगितावच्छेदकयोः शब्दान्तरस्थापितयोः संस्कार
प्रागल्भ्यात् शाब्दान्तरत्वविषयत्वावोनियमेन युज्यते। घटगोचरप्रबलसंस्कारवत दासादितघटस्म
रणस्य घटाव्युत्पन्नस्य घटमानयेति वाक्यश्रवणानंतरं घटानयनबुद्धिप्रसंगात्। नवाकाशादि
प्रतिबंदिग्रहो युक्तः। नियमेन तत्र शब्दसमवायित्वस्यास्फुरणात्। तत्रादि कदाचिदद्दष्टद्रव्यतिन्न
त्वं कदाचिच्छब्दसमवायित्वेस्फौसंरेव शास्त्रतिनासते। अत्रत्वव्युत्पन्नस्य पद्मत्वं नियमेन त्रासतदु
तिमहान् विशेषः। शक्तिरेव तत्रापीति केचित्। नव पश्नश्च गोत्वयोः प्रयोगोपाधित्वं शक्त्युपाधित्वेवा
घटादिपदेन घटत्वादेरपि तथात्वावप्रसंगात् न च तन्निर्विकल्पकोदयान्निपाधौ तेनां गौक्षिपत
तिरुपाधिन्नूतेन घटत्वादिनासंस्कारोपस्थितेन प्रकारेणानिर्विकल्पकोदयतिरासस्यशकोन
घणत्वात्। तस्मात्परिभाषैवैषा प्रयोगोपाधिः शक्त्युपाधिवैंति। नव मत्रैकुंदादो प्रयोगावचारणे

रमात्रोपस्थितस्य पंकजमानायेत्यत्रान्वये पद्मव्यापकानां द्रव्यत्वादीनामप्यन्वयः स्यादिति वाच्यं शब्द
संबंधोपगमेपि संस्कारप्राकट्यस्यावश्योपजीव्यत्वात्तदेवास्तु नियामकं शब्दसंबंधकल्पनया। न
व गंगायां घोष इत्यत्रापि संस्कारादेव तीरविशेषप्रतीत्युपपत्तौ न वृत्त्यंतरकल्पना ज्यायसीति वाच्यं।
गंगापदोपादानवैयर्थ्यात्। अशक्यतात्पर्यकस्यैव तत्रत्वात्। तस्य च पुरुषेच्छाधीनस्याशक्यनिय
मनत्वात्। पद्मपंकजादिसामान्यशब्दानां तत्र तात्पर्यसहयानामेव विशेषबोधकत्वमस्तु कृतं समु
दायशक्तिकल्पनया कथमन्यथा कदाचित्कुमुदेपि प्रयोगाल्लक्षणयेति चेत्। मम मनुमुख्यतयेति म
हान् विशेष इति पूर्वपक्षसंक्षेपः॥ ॥अत्राभिधीयते॥ ॥पंकजमानयेति वाक्यश्रवणानंतरं पद्मानय
नं कुर्वतः प्रयोज्यस्य पद्मानुभवो निश्चीयते। तत्र च संस्कारमात्रेण शात्पन्नत्वजाते नियमतः कल्प्यमा
नेऽव्युत्पन्नस्यापि तथाज्ञानप्रसक्तौ किंनियामकमव्यवस्थितमापुष्पता। दृश्यते चात्र व्युत्पत्तिग्रहोपे
क्षा। कथमन्यथा प्रत्येकव्युत्पन्नस्य ध्वंसः पंकजमानयेति श्रुतवतोपि न पद्मानुभवः। यथा समुदा

रिणमासाद्यकलापं प्रवतीत्यत्रान्वयबोध इति। तत्तदाशानते यदि तात्पर्यग्रहस्य वाक्यार्थप्रतीतौ च मीहा
महेतदेव तु नास्ति प्रमाणाभावात्। अत्र कृत तात्पर्यमस्य न ज्ञायते अस्माद्वाक्यादयमर्थस्तावत गम्य
तइति विविच्य परावृत्य कुत्रास्य तात्पर्यमिति पृच्छति प्रयोज्यवृद्ध इति। न च लक्षणास्थले तात्पर्यग्रह
स्य करणत्वावधारणादन्यत्रापि तत्कारणत्वकल्पनमिति वाच्यं। तत्र हि पदार्थोपस्थित्यनुकूलत्वं
तात्पर्यज्ञानस्य तावता विना तत्र पदार्थोपस्थितिरेव न भवति न तु वाक्यार्थप्रतिपत्त्यनुकूलत्वं। ४
अत एव तत्र पदार्थमात्रे तात्पर्यं न वाक्यार्थे। तथा वक्तुरुषांतरोदीरितकलापं पादनस्वयं स्कृतेन
पवतीत्यस्य समभिव्याहारप्रतिसंधीनेन भवत्येवान्वयप्रत्ययः। यथा नानापुरुषैः खंडशः क्रियमा
णश्लोक इत्युक्तमुपरिष्यामः। किं च द्वारं पिधेहीत्यत्र शब्दद्वारान्वयबोधस्य तदुपस्थापकपद
जन्यत्वदर्शनादन्यत्रापि तदेव कल्पनलाघवात्। अपि च विभक्तिविशेषसमभिव्याहारमासाद्यै ४२
व परंपरानामनुत्तावकत्वं तथैवाकांक्षादिदर्शनात्। अन्यथा गामानयपत्यत्रेव गोः कर्म्मकानयनं

पद्मत्वस्मरणस्यप्रतिबंधकत्वं। पंकोत्तरजपदस्य वा यात्किको- वांकल्पनीयं। अव्युत्पन्नस्य पंकजपदात्तं
कजवनिकार्द्रत्वेनरूपेण कुमुदादिबोधदर्शनात्। अत एवाव्युत्पन्नः पंकजमानयेति वाक्यश्रवणानं
तरं कुमुदाद्यानयने दोलायते। न च सामान्यशब्दत्वादमीषां विशेषतात्पर्यवशात् विशेषबोधकत्वमि
ति वाच्यं। वस्तुगत्या यो विशेषः तद्बोधकत्वं वा। विशेषेण प्रकारेण वा। नाद्यः। पद्मत्वाद्यनुगतवाधाता
त्। नेतरः। सद्धि विशेषः शक्तिगोचरो न वा। नाद्यः। विवादपर्यवसानात्। नेतरो लक्षणापातात्। न वात्रै
वापत्तिः। स्वार्थविशेषितस्यैव पद्मत्वस्य ज्ञानात्। वाक्ये न लक्षणोत्थप्याद्भः तात्पर्यप्रतिसंधाने
पि पंकजमानयेति वाक्यबोधान्तरपद्मानयनबोधाव्यवधारणात्। अन्यथा पटपटादिशब्दानामपि सा
मान्यशब्दमेवास्त्वत तद्विशेषतात्पर्यवशाद्विशेषबोधकत्वमुपपद्यते इति ब्रुवाणं को वाधयिता स्यात्।
नव पंकजं कुमुदमानयेत्यत्र पंकजपादलक्षणा किंतु पद्मत्वमुपस्थितमप्ययोग्यतया नान्वेति अवय
वार्थ एव परमन्वेतीति न किंचिदनुपपन्नं। पंकजं प्रत्यक्षोपस्थितेनापि कल्पेन तात्पर्य ग्रहं सहका

न॰१

न्वयेवाक्यंभेदप्रसंगः केन वारणीयः। कथं वा गवादिपदेपि न योगरूढिः कोहि गमेर्डो सप्तम्यां जनेड इत्य
नयोर्विशेषः येनैकत्र रूढिमात्रमितरत्र योगरूढिरिति॥ ॥अत्राभिधीयते॥ ॥पंकजमानयेति वाक्या
त्पंकजनिकर्त्तारं पद्ममानयेति प्रतीतिर्जायत इत्यनुभवसिद्धं। तत्र पंकजपादन प्रत्येकसमुदायश ४४
क्तिप्रतिसंधानसहकारिवशात् मिलितगोचरमेव स्मरणं जन्यते। तत्रासत्तिवशेन पंकपदार्थस्या
धारत्वेन जनिपदार्थस्याधेयत्वेन क्रिपाकर्तृत्वेन प्रत्ययार्थस्य तत्रैवांतर्गतया पद्मत्वस्य एतद्वि
तयविशिष्टेऽन्वयानयनस्यैकदैवान्वयः प्रतीयतां ननु पद्मत्वविशिष्टपंकजनिकर्तृत्वं तद्विशिष्टे वा
नयनमिति प्रतीयातां यद्वा पंकजनिकर्तृत्वानां प्रत्येकपदोपस्थितानां प्रथमतस्तावदन्वयबोधः ४३
तदनंतरं तत्र समे पद्मत्वस्यानंतरमानयनान्वय इत्याद्यूह्यं। न च पंकजपदस्यैकत्वात्कथमनेका
न्वयबोधकत्वमिति वाच्यं। समुदायापेक्षया पंकजशब्दस्य पदत्वमवयवापेक्षया वाक्यत्वमिवानव
गवादिशब्देपि योगरूढिः प्रत्ययस्य शक्त्यावधारकत्वयानावात् गमेर्डः इति वचनं वपथाकथ

क्तिरित्यत्रान्वयबोधप्रसंगात्। एवं सर्वपदार्थानामेव पदोपस्थापितत्वेनैतेमेव तंत्रं प्रमाणवतो गौरवस्या
पिन्याय्यत्वादिति न्यायात्। यद्वा पदोपस्थापितपदार्थं चमेवतंत्रं न तु सर्वं चं तं तंत्रं किंतु संकोचकान्ताव
तापदार्थमात्रमादाय विश्राम्यतीत्यलमपि पीति डिय तेस्मात्पदाध्याहार एव युक्तो नार्थाध्याहार इति।
तस्मात्पंकजशब्दः पद्मत्वेशक्तः वृत्यंत्तरविरहे सति व्युत्पन्नं प्रतिनियमः। पद्मत्वावच्छिन्नं प्रतिपो
गिकान्वयबोधजनकशब्दत्वात्। पद्मशब्दवदिति। गृह्विवादस्तु पंकजमानयेत्यत्र पंकजशब्दान
वाक्यार्थज्ञानानुकूलं कीदृक्पदार्थज्ञानं जन्यात्। पद्मः पंकजनिकर्तृत्वाकारमिति चेत्। तत्किमनु
नवरूपं स्मरणरूपं वा। नाद्यः सामग्री विरोधात्। पंकजनिकर्तृत्वांशे ह्यनुभवसामग्री पद्मांच्चशे
स्मरणसामग्रीति विमिलिताः कथं कार्यं जनयेतां। न द्वितीयः। प्रत्येकसमुदाय संकेततिसंध्यमनज
न्मस्मरणानामेकदासत्वात्। न चैकमेव पंकजनिकर्तृत्वपद्मानां स्मरणं तत्र कार्यदर्शनात्कल्पत इ
ति वाच्यं। एवमपि हि पंकजनिकर्तृत्वपद्मानामानयनान्वयः प्रत्येकं स्यात् न तु विशिष्टस्य न॥ कैंचप्रत्येक

नेकारणं वक्तव्यं तत्प्रकारान्तरं परिशेषाद्व्याप्यत्वमेवेति सिद्धं विशिष्टज्ञानमिति। किंचित्वादिव्यतिरिक्त
स्य धूमत्वादेरेव सत्वे परिशेषस्य क्षीणत्वात् तथा हि व्याप्तेः स्मरणमनुभवो वा तदनन्तरं व्याप्यत्वाव ४५
च्छेदकधूमत्वादिधर्मप्रकारकपक्षनिष्ठधूमज्ञानं तदनन्तरमव्यवहितसमये एवानुमितिरप्रत्यूहमुत्प
द्यत इति। एवमनुपपत्त्यन्तरा विशिष्टज्ञानतत्कारणयोः कल्पने गौरवमेव बाधकं। न च विशिष्ट
ज्ञानसामग्रीबलात्तत्कल्पनं युक्तं। कार्यासिद्धौ सामग्र्या अप्यसिद्धेः। सिद्धौ वा अनुमितिसामग्र्या बाधि
तत्वात्। न वानुमितिसामग्र्यपेक्षया प्रत्यक्षसामग्री बलवतीति वाच्यं। तृतीयलिंगपरामर्शधारावा
हेन प्रसंगात्। तदनुव्यवसायप्रसङ्गाच्च। न वानुमितिसामग्र्यपेक्षया प्रत्यक्षसामग्रीबलवत्वादनुमितिधा
रावहेन प्रसङ्गेनानुमिनोमीत्यनुव्यवसायो न स्यादिति वाच्यं पूर्वसामग्र्या दत्तफलत्वात् अपरसा ४४
मग्र्याश्च सिद्धसाधनत्वेनानुदयात्। अत एव धूमविशिष्टं पर्वतमुपलभ्य समयान्तरेऽपि व्याप्तिं स्मर
तो वह्न्यनुमितिरुत्पद्यत एवानहितत्वे तृतीयलिङ्गपरामर्षसम्भावनापि कारणाभावात्। नहि तत्रैं

श्चिद्व्युत्पत्तिपरं। नन्वेचादिपदेप्येवंस्यात्। न स्यात् तदानुत्पन्नानुशब्दादावाद्योपोद्घापक्रमेणाशक्तेः
कल्पनात् यत्र योगार्थान्वितरूढ्यर्थविबाधः तत्र सर्वत्र योगरूढिरित्येवंपरत्वाद्धा। न च स्वरूढि
रेव न योगार्थान्वयप्रसंगात् यौगिकार्थबुद्धिस्वरूपसहकारिलाभाद्धि शिष्टार्थोपस्थापकत्वे रूढेर्यो
गरूढित्वं नन्वयोगार्थोपि समुदायशक्तिरिति सर्वमवदातं॥ ॥इति योगरूढिप्रकरणं समाप्तं॥१६॥ ।
इहानुमितौ लिङ्गस्य पक्षधर्मताप्रकारकं ज्ञानं कारणमित्युत्तरपवादिसिद्धं। तस्य ज्ञानस्य व्याप्तिप्र
कारकत्वेनानुमितिकारणत्वं न वा। व्याप्तिपक्षधर्मताविशिष्टज्ञानमनुमितिकारणं न वेति विप्रति
पत्तिसंक्षेपः॥ तत्र परेषामयमाशयः। विशिष्टज्ञानस्य किमन्वयव्यतिरेकाभ्यामनुमितिकार
णत्वमन्यथा वा। न तावदाद्यः। अनुमितिपूर्वसमये व्याप्तिज्ञानपक्षधर्मताज्ञानव्यतिरिक्तस्य वि
शिष्टज्ञानस्यैवासिद्धेः। न चस्तु द्वितीयः। तथा हि व्याप्तिस्मरणानंतरं किंचिच्चादिना रूपेण पक्षधर्म
त्वमज्ञानेपि न तावद्वह्न्यनुमितिरुत्पद्यते। तथा वानुमित्युत्पत्तिपूर्वकाले रूपांतरेण पक्षधर्मत्वमज्ञा

कत्वात्। नवयद्दस्तगत्याव्याप्यंतस्याकिंचित्वादिनारूपेणज्ञानादनुमानुमानेस्यादितिवाच्यं।तथाहिकिंरू
पानुमितिस्तत्रापावृतोकिंधूमादिलिंगाविशेषोपहितात्लिंगसामान्योपहितावा।नाद्यः।धूमादित्रकार ४६
कज्ञानादेवतदुपपत्तेः।नद्वितीयः।तथात्वेतानुमितेरेवासिद्धेः।किंच्यप्यव्यतिरेकात्तृतीयात्लिंगपरा
मर्षस्तत्रनोत्पद्यते।तद्व्यतिरेकादेवानुमितिव्यतिरेकस्योपपत्तेः।नन्वनुपपन्नमेतत्।पद्दस्तगत्या
वह्निव्याप्यंतद्विशिष्टज्ञानादप्यनुमितिर्नविघ्यति।तथाहिपद्दस्तगत्यानवह्निव्याप्यंतज्ञानादेव
तत्रानुमित्युपपत्तेः।तस्मात्सर्वथानुपपन्नोलिंगपरामर्शस्यसर्वत्रमकारणता।त्रिमानानैपा
पिकानामिति।एवंप्राप्तेत्रिधीयतेव्याप्तिस्मरणानंतरंकिंचित्वादिनारूपेणधूमविशिष्टपर्वतज्ञा ४५
नाद्वह्निर्नानुमीयतइत्यविवादः।तत्रकिंधूमत्वप्रकारकज्ञानव्यतिरेकात्कार्यव्यतिरेकःकल्प्यताव्या
प्यत्वप्रकारकव्यतिरेकाद्वा।तत्रप्रथमस्यगौरवकरत्वात्द्वितीयस्यव्याप्तिज्ञानेस्वीकारात्लघुत्वा
च्चद्वितीयएवज्यायान्।एतदेवानुसन्धीयाचार्यैरिदमुक्तं।तत्रलिंगत्वोल्लेखिवृत्तीयंज्ञानमेष्टित

ङ्गि यं कारणं असन्निकर्षात्। न च ज्ञानान्तरेऽपि नीतधूमे मानस एव परामर्ष इति वाच्यं। वह्निविशेष्यके
ज्ञाने मनसः सर्वथा अस्वसामर्थ्यात्। नापि संस्कारः पूर्ववह्निव्याप्यधूमत्वेनानुभूतत्वाभावात्। तथा चानुमा
निकः परामर्षोऽनवरुद्धापातात्। किंवा केवलव्यतिरेक्यनुमानवादिनां वता कथं तत्र तृतीयः परामा
र्षः सम्बधनीयः इतरभेदव्याप्यत्वस्य पृथिवीत्वेऽग्रहात्। अग्रहे वा साध्यहेत्वोर्नियतसामानाधिकर
ण्यस्य पृथिव्यां व्याप्तिग्राहकेनैव परिच्छिन्नत्वात् किमधिकमनुमेयं स्यात्। व्यतिरेकव्याप्तिग्रहदशा
यां च दर्शने इतरभेदानुमितेः स्वीकृतत्वाच्च। न तृतीयलिंगपरामर्षमस्वीकुर्वतां त्वया अनुमि
तित्वावच्छिन्नं कार्यं प्रति किमनुगतं कारणं वाच्यं। न तावद्धूमत्वादिविशिष्टपरामर्षोऽननुगमात्। न
हि व्याप्यत्वावच्छेदकप्रकारकवह्निविशिष्टपरामर्षः उपजीव्यत्वेन व्याप्यत्वस्यैव तथात्वे नांगीकारात्वा
दिति मैवं। अनुमितित्वावच्छिन्नं प्रति व्याप्तिज्ञानस्यैव कारणत्वात्। धूमादिविशिष्टपक्षज्ञानस्य अनु
मितिविशेष एव प्रयोजकत्वात्। यद्वा पक्षस्कन्धगत्या व्याप्यं तद्विशिष्टज्ञानस्यैवानुमितिमात्रं प्रति प्रयोज

व्यत्वात् स एवानुमितौ कारणमस्त्विति वाच्यं। अवच्छेदकज्ञानं वह्निव्याप्यत्वसाक्षात्कारे कारणं ननु व्या-
प्यत्वाज्ञानमात्रे। अवच्छेदकग्रहं विना वह्निव्याप्यवानयमिति वाक्याद् व्याप्यज्ञानदर्शनात् किंचै-
वमवच्छेदकस्यापि कारणतानस्यात्। तत्रापि पञ्चपञ्चीव्यं तदेव कारणमास्तामित्यस्यापि स्तव वक्त्वा-
त्। एतेन व्याप्तिस्मरणेपि किंचिद्वैनरूपेण पदार्थस्मर्त धूमत्वादे सति यद्व्यतिरेकात् तृतीयलिंगपरामर्शव्य-
तिरेकः तद्व्यतिरेकेणममाप्यनुमितिव्यतिरेक इति निरस्तं। यदुक्तमसन्निकृष्टे धूमे विशिष्टज्ञानसम्भव
इति व्यवहारो न स्यादिति। तस्मादुक्तपवादिसमाधेयमेतत् किञ्चिद्दिष्टं किं तेन। तथापि स्त्र हृष्ट्वावनकितत्रे
तदपिमंदं। तथापि परेणाहितत्रव्याप्तिविशिष्टज्ञानमुत्पद्यत इति स्वीकर्तव्यं। अन्यथा धूमो वह्निव्याप्य इति
कारणमिति ब्रूषे तदा तद्गुणज्ञानं तत्रोपनीत धूमे संयुक्तसमवेतलक्षणया प्रत्यासत्त्या ज्ञानरूपयाम-
न एव तत्र कारणं न च वह्निविशेष्यके प्रत्यायमनसोऽस्यात् त्र्यमति प्रसङ्गादिति वाच्यं। ज्ञानं तत्रोपन-
यनस्यैव नियामकत्वात्। न च विशेषणतया तत्प्रत्यासत्त्या विशेषणमेव तत्रासत इति वाच्यं। इह तूत

९४ ८७ ८८

व्याप्ति। न च धूमाद्युपहितानुमितौ धूमत्वादिप्रकारकज्ञानस्य पूर्वमनुपजीव्यत्वेन धूमत्वादिप्रकारकल्प
नैव युक्तेति वाच्यं। तस्य ह्यनुमितित्वविशेषं प्रति प्रयोजकत्वं न तु सामान्यं प्रति प्रकृते तत्त्वेनानुमितिमात्रं
प्रति कारणत्वावच्छेदकः प्रकारो विचार्यते। न च तथा धूमत्वादि। व्यभिचारात्। किन्त्वनुगतं तदुपहितव
द्यनुमितिञ्च न धूमत्वादिप्रकारकज्ञानप्रयोज्यं किन्तु तद्व्याप्यप्रकारकज्ञानप्रयोज्यं। धूमत्वादिप्रका
रकज्ञानप्रयोज्यन्तु धूमादिविशिष्टज्ञानत्वमेव। यत्तु न विकल्पापादनदूषणं कृतं तदापादनमात्रोच्छेदक
रत्वेनोपेक्षणीयं। तथाहि सामान्यप्रसिद्धिमादायापादनं प्रवर्त्तते न विशेषप्रसिद्धिं। न चैवं सर्वत्र दर्शना
त्। यत्तु नरुक्तं ज्ञानद्वयानन्तरं तृतीयज्ञानमुत्पद्यत इत्यसिद्धं। अनुमितिसामग्र्याः प्रतिबन्धकत्वादिति।
तदपि मन्दं उक्तन्यायेन तत्कारणत्वव्यवस्थितेनोतद्विरहे अनुमितिसामग्र्या एवासिद्धेः। कश्चित्तु ज्ञानद्वया
नन्तरमेव विशिष्टज्ञानमुत्पद्यत इति न भ्रमः। किन्तु व्याप्तिरूपविशेषणज्ञानसंभवात्। द्वितीयज्ञानावसरा
एव वह्निव्याप्यधूमवानयमिति ज्ञानस्य सत्त्ववरस्याकुः। न च व्याप्यत्वज्ञानेपि धूमत्वाद्यवच्छेदकग्रहस्यापेक्षा

केवलव्यतिरेकिणि अनुपपत्तिरुक्ता। तदपि न भद्रं। तथाहि। तत्र व्यतिरेकद्वयसहचारेणान्वयव्या
प्तिरेव गृह्यते। तद्धि शिष्टं च पृथिवीत्वं पक्षे गृह्यते। व्याप्तिश्च न साध्यसामानाधिकरण्यं भन्नं तीव
नये न फलाभावः। सर्वं वैतद्व्यतिरेकिस्थले स्फुटी भविष्यति। अन्ये तु विशिष्टपरामर्शस्यानु
मितिकारणत्वे तिनिगमनमाकुर्यं धूमव्याप्तिर्वह्निव्याप्या न वेति संशये विपर्यये च तावद
नुमिति नोत्पद्यत इत्यविवादं। तथा चेयं वह्निव्याप्यविज्ञाने अनुमितिरुत्पद्यत इति तत्कथं। न
च किमर्थं वक्तव्यं संशयविपर्ययाभाव एतत्र कारणमास्तामिति वाच्यं। तावदभावापेक्षया वि
शिष्टपरामर्शस्य कारणत्वे लाघवात्। विनिगमनाभावेनोभयोः कारणतासंभवात्। न च
सर्वोपसंहारेण व्याप्तिग्रहणानन्तरमियं व्याप्तिर्वह्निव्याप्या न वेति संशये विपर्यये वा संभव
इति वाच्यं। सामान्यनिश्चयस्य सामान्यसंशयविपर्ययप्रतिबंधकत्वात्। विशेषसंशयविप
र्ययोर्विशेषनिश्चयनिवर्त्तनीयत्वात्। किंच। यत्र संशयो यत्र प्रतिबंधको भवति। तन्निश्चयस्त

४८

४७

लेघटत्वावविशेष्यकस्यप्रत्ययस्यदर्शनात्।जंबीरस्यरूपरसावितिसर्वसाधारणप्रत्ययात्।नचैवम
नुमित्युच्छेदः सर्वत्रज्ञानांतरोपनीतस्यवह्नेर्ज्ञानसंभवादितिवाच्यं।नहिज्ञानान्तरोपनीततत्वानेऽनु
मितिव्यवहारोऽतिप्रसंगात्।नहिमनोजन्यतामात्रेणमानसत्वं।किंचसाधारणाकारेणतानिरपेक्ष्य
मनोजन्यत्वेनानवानुमित्यादौतथापरामर्शादसाधारण्यापेक्षानियमान्।यद्वाऽनुमानादे
वतत्रपरामर्शेऽप्युत्पद्यते।नवानवस्थादोषः।क्वचित्स्मृतावेवविश्रांतेः।अन्येतुपरामर्शेपक्षविशेष्य
कमतंत्रमेव।किंतुपक्षवृत्तेर्विशेष्यस्यव्याप्यत्वंस्फुरतियत्रतत्रानुमितिरुत्पद्यते।एवंचतत्वतत्र
परामर्शः।पक्षवृत्तिर्वह्निव्याप्यइति।अयमप्यनुमितिरूपएव।अत्रधूमत्वंलिंगं।धूमत्वस्यवह्नि
व्याप्यत्वं।व्यक्त्यंतरसन्निकर्षाद्गृहीतं।असन्निकृष्टपर्वतवृत्तिधूमसंबंधितात्प्रत्यासत्त्यैवगृह्य
ते।तस्मात्प्रत्यक्षरूपादेवंपरामर्शात्पर्वतवृत्तिःसधूमोवह्निव्याप्यइत्यनुमितिरूपःपरामर्शोजा
यते।तस्मात्परामर्शात्पर्वतोवह्निमानित्यनुमितिरुत्पद्यतेइतिनकिंचिदनुपपन्नमित्याहुः।पक्ष

भावो वा। अविनाभावो वा। निमित्तनैमित्तिकत्वं वा। अन्योन्याभावविशेषो वा। यावत्साध्यव्यापक
व्याप्यत्वं वा। यावत्साध्यव्याप्यव्यापकत्वं वा। अविनाभावो वा। निमित्तनैमित्तिकत्वं वा। व्याप्या ५९
त्यंताभावप्रतियोगिसाध्यसामानाधिकरण्यं वा। साधनाभावव्यापकाभावप्रतियोगिसा
ध्यसामानाधिकरण्यं वा। संबंधमात्रं वा। अन्यद्वा। न तावदाद्यः। किं तदनौपाधिकत्वं। उपा
ध्यजन्यत्वं वा। उपाधिविरहितत्वं वा। नाद्यः। धूमे साध्ये वह्नेरपि गमकत्वप्रसंगात्। न हित
योः संबंधस्तूपाधिनाजन्यते। न द्वितीयः। उपाधिरहितत्वं हि तदुपाधिरहितत्वं वा। अन्योन्या
धिरहितत्वं वा। नाद्यः। संभवात्। वह्नौ साध्ये धूमस्याप्यगमकत्वप्रसंगात्। तदुपाधिरहित ४८
त्वस्य तत्र प्रत्येतुमशक्यत्वात्। तदुपाधिप्रतीतौ च सोपाधितापत्तेः। न द्वितीयः। धूमस्यापि
कश्चिदुपाधित्वेन तद्विरहस्यासंभवात्। उपाधिनिर्वचनेऽन्योन्याश्रयप्रसंगाच्च। नापि

स्यकारणं भवतिसामान्यतःसिद्धं। अत्रापि पक्षधर्मस्य व्याप्यत्वसंदेहादनुमितिर्नोत्पद्यत इत्यवश्यं
पक्षधर्मव्याप्यस्य व्याप्यत्व प्रकारकनिश्चयकारणं वक्तव्यमिति। किंच। पर्वतोवह्निव्याप्यत्वा
नयमिति शब्दज्ञानात तत्र वह्न्यनुमितिरुत्पद्यत इत्यविवादं। भवतत्र व्याप्यत्वावच्छेदकः प्रकारी
भासत इत्यवश्यं पक्षधर्मस्य व्याप्यत्वज्ञानमनुसरणीयं भवतत्र व्याप्यत्वस्य व्याप्यत्वमेवाव
च्छेदकः प्रकोरो भासइतिवाच्यं। यद्वह्निव्याप्यवद्भवति। तद्वह्निमद्भवतीत्यवश्यमवच्छेदकरू
पाप्यारोपे व्याप्ति भानेप्रमाणभावात्। किंतु तत्रावच्छेदकरूपेवच्छ्मवह्निव्याप्तिर्भासतइति। किं
वा तज्ज्ञाने वावच्छेद्यव्याप्यत्वमेव भाति। तदा सर्वत्र तदेवास्त्विति। ननु केयंव्याप्तिः। अनोपाधिक
त्वं वा। स्वाभाविकत्वं वा। अव्यभिचारितत्वं वा। कार्त्स्न्येन संबंधो वा। साधनसमानाधिकरणयावद्ध
र्मसमानाधिकरणसाध्यसामानाधिकरण्यं वा। विशिष्टवैशिष्ट्यं वा। तादात्म्यं वा। कार्यकारण
३॥ इति तृतीयलिंगपरामर्शः॥ ॥१७॥ ॥७॥

सामानाधिकरण्यं सकलसाध्यव्यक्तेर्वाभिप्रेतं । यत्किंचित्साधनसमानाधिकरणयावद्धर्मसामानाधि-
करण्यं सकलसाध्यव्यक्तेर्वा विवक्षितं । साधनाभावच्छेदकधर्मवद्यत्किंचिद्व्यक्तिसमानाधिरैके-
णयावद्धर्मसमानाधिकरणमात्रवृत्ति साध्यत्वावच्छेदकधर्मवद्व्यक्तिसामानाधिकरण्यं वा । याव-
त्साधनसमानाधिकरणयावद्धर्मसामानाधिकरण्यं वा । नाद्यः । रासभसाधारण्यात् । न द्वितीयः ।।
असंभवात् । नहि सकलसाधनसमानाधिकरणैर्धर्मैः सर्वासाध्यव्यक्तयः समानाधिकरणाः ।।
अत एव न तृतीयः । न चतुर्थः । अधिकवृत्तिसाध्ये तदभावात् । न पंचमः । एकव्यक्तिकेयावदर्था-
भावात् । व्याप्तिग्रहे सिद्धसाधनप्रसंगात्च ।। नापि षष्ठः । त्रैकालीत्यादूषितत्वात् । यथा कथंचित्सं-
भवे एवंतोद्ज्ञानेप्यनुमितेर्जोपमानत्वात् । गौरवकरत्वाच्च । अन्यथोपपत्तेर्वक्ष्यमाणत्वात् । नापि
सप्तमः । अव्यापकत्वात् [illegible] गम्यगमकभावानुपपत्तेश्च । नाष्टमः । अका-
र्यकारणयोरपि व्याप्यव्यापकभावात् । नापि नवमः । अविनाभावो हि साध्यं विना हेत्वभावो वा वि-

५०

४७

द्वितीयः। स्वाभाविकत्वं हि स्वभावजन्यत्वं वा। स्वभाव एव वा। स्वभावोपि स्वरूपं वा। स्वधर्मो वा। ना
द्योऽसंभवात्। नहि कश्चित् स्वात्मना स्वधर्मेण वा जन्यते। नतरः। व्यभिचारिसाधारण्यात्। तस्य
भावस्यापि स्वभावत्वात्। नापि तृतीयः। अव्यभिचारित्वं हि व्यभिचारशून्यत्वं विवक्षितं। व्यभिचा
रश्च साध्यात्यंताभावसामानाधिकरण्यं वा। एतच्च केवलान्वयिनि न संभवति। तत्र साध्यात्यंताभा
वाप्रसिद्धेः। संयोगादावव्याप्यवृत्तौ च साध्ये साध्यात्यंताभावसामानाधिकरण्येपि व्याप्तिरिष्य
माणत्वात्। किंच। व्यभिचारस्य साध्यनिर्वचनाधीननिर्वचनत्वेन साध्यस्य व्यापकत्वे नान्योन्याश्र
यात्। नापि चतुर्थः। कार्त्स्न्येन सामस्त्येन हि प्रकारेण संबंधो विवक्षितः। न च सामस्त्यं संबंधघ
टकः प्रकारः। समस्तव्यक्तिगर्भस्य संबंधस्याभावात्। प्रत्येकं तथात्वे सामस्त्याभावात्। व्य
भिचारिसाधारण्यात् पक्षांतरप्रवेशात्। नापि पंचमः। साधनसमानाधिकरणयावद्धर्मसा
मानाधिकरण्यं हि किंचित्साध्यव्यक्तेर्वा विवक्षितं। सकलसाधनसमानाधिकरणयावद्धर्म

संबंधमात्रज्ञानस्यअनुमित्यजनकत्वात् । व्याप्तिज्ञानस्य येन रूपेणानुमितिकारणत्वं तस्य दुर्निरू
प्यमाणत्वात् । नापि संबंधत्वं संयोगाद्यनुगतमस्ति । नापि स[illegible]दशः । तदनिर्वचनात् । अखंड एव
व्याप्तिपदार्थ इति चेन्न । न निष्यामकसद्भावेनैवान्यथासिद्धिः । अन्यथोपपत्तेर्वक्ष्यमाणत्वाच्च ।
नन्वविनाभाव एव व्याप्तिः । न च केवलान्वयिन्यव्याप्तिः । साधनसमानाधिकरणव्याप्यवृत्त्य
त्यंताभावाप्रतियोगिसाध्यकत्वस्य तदर्थत्वात् । अन्योन्याभावेन वा तन्निर्वचनात् । तथाहि । सा
धनसमानाधिकरणान्योन्याभावाप्रतियोगिसाध्यवच्चं वा । साधनत्वाभिमतसमानाधिकर
णान्योन्याभावप्रतियोगितानवच्छेदकसाध्यकत्वं वा । तदर्थ इति । एतदपि न । व्याप्त्यंतरेणाप्रति
योगित्वस्य निर्वक्तुमशक्यत्वात् । साधनत्वाभिमतसाध्यत्वाभिमतयोरपि व्याप्तिपदार्थत्वप्र
संगात् । कथं वाव्यर्थविशेषणेनातिप्रसंगः । तत्र व्याप्तेरनभ्युपगमात् । अत्यंताभावान्योन्या
भावाभ्यां निरुक्तयोर्मध्ये का व्याप्तिः । न तावद्द्वितीयमपि । अननुगमात् । नाद्यमसाधारणास्य

५१

५०

वह्नितः। तथा च केवलान्वयिन्यप्रसिद्धेः। नापि दशमः। निमित्तनैमित्तिकत्वं हि कार्यकारणभावो
वा। समानावच्छेदकत्वं वा। नाद्यः। कार्यकारणभावप्रवेशात्। न द्वितीयः। अवच्छेदकत्वं हि सामाना
धिकरण्यमात्रं वा। नियतसमानाधिकरण्यं वा। नाद्यः। व्यभिचारिसाधारण्यात्। न द्वितीयः।
अन्योन्याश्रयात्। यथा कथंचिदवच्छेदकत्वनिर्वचनेप्यवच्छेदकत्वांतर्भावेन व्यापकत्वव्याप्य
त्वयोस्तां। तथा च केवलधूमस्य व्याप्यत्वे केवलस्य वह्नेर्व्यापकत्वं न स्यात्। नाप्येकादशः। तथा
हि तेऽन्योन्याभावेऽप्रमाणाभावात्। तदेवास्तीति चेत्। न दूषितत्वात्। नापि द्वादशः। आत्माश्रया
६४ अव्यभिचारादेव तद्बोधे अव्यभिचारस्योपजीव्यत्वेन तस्यैव व्याप्तित्वस्वीकारस्योचितत्वात्॥४६॥ त्रौसा
ध्यव्यापकपदेन साध्यसमनियतविवक्षायां शेषवैयर्थ्यात्। न च तादवस्थ्यमिति वाच्यं। साध्यव्या
प्यत्वस्यैव तथात्वे शेषवैयर्थ्यात्। नापि त्रयोदशः। आत्माश्रयात्। शेषावैयर्थ्याच्च। नापि चतुर्द
शः। अव्याप्यवृत्तौ साध्यकेवलान्वयिन्यभावात्। अत एव नापि पंचदशमः। नापि षोडशः॥

तेषां व्याप्यत्वेपि दोषाभावात् तत्रापि वाय्वनुमितिः स्यादिति चेन्न । तेषां मपक्षधर्म्मत्वात् । न च केवलान्व
यिन्यव्यतिरेकव्याप्तिः । तत्र केवलान्वयित्वेप्येव व्याप्तित्वात् । द्वलारत्तिमनिन्यायेन कार्यविशेषस्य कल्प
नादित्याहुः । अपरे तु साधनव्यापकधर्मावच्छिन्नसाध्यसंबंधो व्याप्तिरित्याहुः । एतदंगश्चावच्छेदका
भावात् । अवच्छेदकस्य साधनव्यापकताविरहात् । संबंधस्वरूपविरहात् संबंधिविरहात् अवच्छेद
कः समनियत एव । एतदभिप्रायेणोच्यते । समनियत एवोपाधिरिति । एवम्भूतोपाधिना सोपाधि
व्याप्यत्वासिद्ध एवान्तर्भवति । व्यभिचारोन्नायकतात्तिरस्तु तद्योग्यतामात्रेण विषमव्याप्योपाधि

५२

श्च न दूषणं । व्यभिचाराऽनियमाप्रतिसंधानेऽप्युपाधिज्ञानेप्यनुमितिदर्शनात् । अन्यथा ह्यत्वा नासाधि
वकप्रसंगात् । व्यभिचारोन्नयनदशायां त्वन्यत्रकृप्तसामर्थ्येन व्यभिचारदूषणमिति ज्ञेयं । सा च व्या
प्तिर्भूयःसहचारदर्शनव्यभिचारादर्शनान्नोपाधिकत्वग्रहेपि पक्षबाधकात् तर्केण गृह्यते । ननु सकृ
द्दर्शनेनैव व्याप्तिग्रहात् । न तु भूयोदर्शनेन । भूयोदर्शनस्य शतशो व्यभिचारित्वात् । तत्र सहकारि

५१

कस्याभावात्। तस्मादव्यभिचारितसंदर एव व्याप्तिपदार्थ इति॥ ॥अत्रोच्यते॥ ॥प्रतियोगित्वं तावदसा
व विरहात्मत्वाम वच्छ्रावत्वं वसदानानधिकरणत्वमेवा परं विरोधित्वमेव प्रतियोगित्वविरोधित्वं च
यद्येन सह न प्रमीयते तत् तेन सह विरुद्धं न वा तावत्साध्ये व्याप्तिः। अत्रापि विरोधित्वस्य विद्यमान
त्वात्। न वानन्त्यगमः। लाघवेनान्योन्याभावत्वात्तु संसर्गेन व्याप्तेर्वक्ष्यमाणत्वात्। न च एतावता रामतिन्याये मी
त्र समाधानमित्यथाहुः। न वा निमित्तपदार्थभावे न व्याप्तिपदार्थप्रसंगः। परं च समानाधिकरणान्यो
न्याभाव प्रतियोगि न त्व वति। तत्र व्यापकं। पदसमानाधिकरणान्योन्याभाव प्रतियोगितायेन नावच्छि
द्यते। तत्र स्य व्याप्तं। न वात्र सर्वनामषण्डुनाव तारः। तस्य सकललोकव्यवहारोच्छेदकत्वेनोपेक्ष
णीयत्वात्। न च व्यर्थविशेषणेति प्रसंगः। तत्र व्याप्तेर्वक्ष्यमाणत्वात्। न हि तत्र व्याप्तिरेव न तत्र व
र्तन इति व्यर्थविशेषणार्थः। अपि तु तेन विशेषणेन व्याप्तिर्नावच्छिद्यत इति केचित्तु साध्यात्यंताभा
वासामानाधिकरण्यं व्याप्तिः। न चाकाशादीनामवृत्तीनामपि वह्निव्याप्यत्वापत्तेः प्रसंग इति वाच्यं
त्वे

त्। यद्ययं धूमो वह्निव्यतिरेकेण स्यादकारणकः स्यात् इत्येवमाकारस्य तर्कस्य प्रथमदर्शनसमयेऽसंभ
वात्। एतेन य एव संबंधो मया गृहीतः स एवेदानीं गृह्यत इति निरस्तं संबंधमात्रस्याव्याप्तित्वात्। व्या
प्तिग्रहस्य च निरूप्यमाणत्वात्॥ किंच सकृद्दर्शने वह्निधूमयोः कस्य स्वाभाविकः कस्यौपाधिक
इति निश्चेतुं न शक्यते। व्यभिचारिसाधारण्यात्। योग्यायोग्योपाधिनिरासस्याशक्यत्वात्। यद्य॥
सर्वोपसंहारेण सामान्यलक्षणप्रत्यासत्त्या व्याप्तिर्ग्राह्या। सामान्यं चानंतं सकृद्दर्शनगम्यमतो न
चादर्शनोपयोगः। ननु सर्वोपसंहारेण व्याप्तिर्गृह्यते इत्यत्र किं गृहीततावद्व्यक्तिव्यतिरिक्ताती
तानागतव्यक्तिज्ञाने प्रमाणाभावात्। नार्वाचीनैः षोढा प्रत्यासत्तिर्बहिरिन्द्रिया वाच्या नवा पक्षनिष्ठधूमग
तव्याप्तिज्ञानस्यानुमित्यकारणत्वेन स्वयानुमानस्य पक्षनिष्ठधूमव्याप्यत्वग्रहजन्यत्वे त
द्व्यापकत्वग्रहाधीनसामान्यलक्षणप्रत्यासत्त्या शक्तिः कल्पनीयेति वाच्यं। तत्र मया व्याप्तिग्रह
स्यानंगीकारात्। व्याप्यजातीयानुमितेः कारणत्वादिति। मेवं। वह्निप्रतियोगिकव्याप्तिविशिष्ट
पावधूमग्रहस्य मानसप्रत्यक्षसिद्धत्वात्। तदनुरोधेन सामान्यलक्षणायाः प्रत्यासत्तेः कल्प

५३

५२

विशेषस्वीकारे प्रथमदर्शन एव तत्कल्पत्वात्। अत एव पपवर्संबंधो मया गृहीतः पुरा स एव पश्चादपि गृह्य
त इति व्यवहार इति मेवं। सकृत्सहचारदर्शने तु न कोप्युपस्थितो व्यभिचारसंसयो न वन्यथा वा भूयोदर्श
नेन तु यैव [illegible] शं तु उपपक्षोपस्थितो कदाचिद्व्यभिचारो वा संशयो न भवन्यपि अतो भूयोदर्शनस्य व्याप्ति
ग्रहकारणत्वस्वीकारात्॥ घु। किंवा सकृद्दर्शनेन व्याप्तिर्गृह्यत इति कोर्थः। किं प्रथमदर्शनस्यैव व्या
प्तिविषयत्वं। व्याप्तिविषयज्ञानजनकत्वं वा। नाद्यः। प्रथमदर्शनस्य व्याप्तिविषयत्वे अनंतरं संसयो न
स्यात्। निश्चितसंशयीयोगात् न च भूयोदर्शनेपि समानमेतदिति वाच्यं। न हि भूयोदर्शनेन व्याप्तिर्गृ
ह्यते एवेत्युच्यते किंतु यदा गृह्यते तदा तत्कोदिसहकारिणा भूयोदर्शनेनैव। अत एवोच्यते। न दर्शना
नां बहुत्वसंख्यानियम इति। ननु ममापि समानमेतत्। न हि सकृद्दर्शनेन व्याप्तिर्गृह्यत एव किंतु य
दा गृह्यते तदा तत्कोदिसहकारिणा सकृद्दर्शनेनैवेति मत्सहायेति चेत्। न। प्रथमदर्शनेन तर्कोदिरवानव
तारात्। सर्वत्र संसयोपस्थापितकोटिविषयकस्तर्को भवति। अत्र तु सहचारदर्शनस्य संशापकत्वेन
दनंतरं संशयेन भवितव्यमिति। सहचारदर्शनमत्र पूर्जीव्येव परं तर्कावतारात् निर्विषयकस्य तर्कस्यानावा

दृष्टांतेन तदभावात्। नाद्यः। तावतां दर्शनानामेकदाऽसंभवेन चक्षुरादिसहकारित्वायोगात्। नच संस्का
रस्मारितेषां चक्षुरादिसहकारित्वं। संस्कारस्य स्मृतिमात्रकारणतया कल्पनादिति। मैवं। संस्कारस्या
त्त्रन्वेपि कारणत्वदर्शनात् प्रत्यभिज्ञानेवमरणजौ स्कल्प्यवत्संस्कारकल्पकत्वात्। तूपोद्
र्शनजनिततावत्संस्कारस्यैवैकस्मरणावच्छेदादिसहकारित्वमित्यपि कश्चित्। नच नोपाधि
कत्वग्रहस्य व्याप्तिग्रहकारणत्वेन प्रमाणं किंतूपाधियत्नातावस्य कारणत्वं प्रामाणिकं। न
वानौपाधिकत्वग्रहः शक्यश्च योग्यायोग्योपाधिव्यतिरेकस्य दुर्ग्रहत्वात्। किंवानौपाधित्वंवि
कल्प्य तद्दूषणं कृतं तत्किं ग्राहकतापक्षे नास्ति नास्तीति यत्र अनौपाधिकत्वस्य व्याप्तित्वपक्षे
प्पिन त्रविष्यतीति। मैवं। अनौपाकत्वग्रहणावयोस्तुल्ययोगक्षेमत्वेनोभयोरपि कारणत्वात्। किं
वा। पापवति सति संशयो जायते न तावतैव निर्णय इति अविवादः। नच सहचारदर्शनव्यभिचारादर्
र्शनोपाध्यनुपलंभे व्याप्तिनिर्णयो जायत इति युक्तं तेषु सहस्रसंशयस्यैव दर्शनात् तस्मादिति

५४

५३

नात्। न चातिरिक्तत्रयस्यासत्तिकल्पनापत्तिः विशेषणतयामेवां तन्तोवात्। यद्वा किंतिपयव्यक्तिस
न्निकर्षमात्साध्यसंनिहितातीतानागतव्यक्तिविषयकं ज्ञानं चक्षुरादिनेवजन्यते। न च चक्षुरादिनाऽस
सन्निकृष्टज्ञानजननेति प्रसंगः योगजादृष्टवत् सामान्यत्वस्य नियामकत्वात्। धूमत्वस्य सा
मान्यवयत्वेन सर्वाएवातीतानागतव्यक्तयो ज्ञातं तो यावद्विशेष्यसंनिकर्षस्य गौरवकरत्वात्
साक्षात्काराकारणत्वात्। यद्वा सामान्यलक्षणात्वया सत्या असन्निकृष्टातीतानागतव्यक्त्य
नाव कथं प्रागप्रतीतवह्निविशेषणकापर्वतविशेष्यकमनुमितिज्ञानं विशेषणज्ञानस्य वि
शिष्टज्ञानकारणत्वात् न च तदनुरोधेन व्यापकएव तथास्त्वामितिवाच्यं। व्याप्यापि ज्ञत्यासत्ते
रविशेषात् धूमस्यापि कवि व्यापकत्वात्। नापि द्वितीयः इष्टत्वात्। न ह्यस्माकं दर्शनानां रूप
त्वं न त्वं। किंतु सकलदर्शनेन चक्षुरादिना न व्याप्तिर्गृह्येत। शब्दादिना सकलदर्शनेनापि ग्रहात्।
इति न तन्निषिध्यते। ननु दर्शनानां रूपत्वं वा विवक्षितं। रूपसांदर्शनत्वं। न द्वितीयः। एकमात्र

धिकत्वनियतोव्याप्तिवारोपि। अनयोः समनियतत्वेन त्रामात्रिकत्वात्। एवं च स्वयोग्यास्वयाहकता
वेसमानेपिन्त्तीयलिंगपरामर्शस्यतयोर्मध्ये किंविषयतयाऽनुमितिकारणत्वमस्त्विति विचारे
लाघवाद्व्याप्तिवारविषयतयैवतत्कारणत्वंकल्प्यते। नन्वनौपाधिकत्वविषयतयापि तत्प्रकारतया
परामर्शस्यानुमितिकारणत्वं। स एव हि व्याप्तिपदार्थः। अनौपाधिकत्वादेर्यदि कोपिस्वपरा
मर्शेण व्याप्तिपदं प्रयुंक्ते तत्र वारयाम इति सर्वं चतुरस्रमिति॥ ॥१८॥ ॥प्रवृत्तिपरवाक्यश्र
वणानंतरं प्रयोज्यवृद्धस्य तत्तदर्थसंबंधव्यापारानुकूलां चेष्टामुपलभ्य तत्स्वचेष्टा
याः कृतेः कृतौ चिकीर्षायाश्चिकीर्षायां समानाधिकरणसमानविषयकज्ञानस्यावधृतकार
णताव: प्रयोज्यस्य तत्कारणीभूतं ज्ञानमनुमाय तस्य च ज्ञानस्य वाक्यजन्यता प्रवृत्तौ जनयि
तव्यायां शब्दव्यापारत्वं चावधारयति। तस्य ज्ञानस्य प्रवृत्तिप्रतिजनकत्वं ज्ञानत्वावच्छिन्नवच्छेद्यं
सत्त्वविषयकारावच्छेद्यतामादाय विश्राम्यति स प्रकारो विधीयते ज्ञायते। अनयाव्युत्पत्त्या

५५

ज्ञानकर्म्मविधिरित्युच्यते। तदुक्तं कुसुमांजलौ। प्रवृत्तिः कृतिरेवात्र सा चेच्छातो यतश्च सा। तज्ज्ञानं
विषयस्तस्य विधिस्तज्ज्ञापकोथवा। अभीष्टसेको रागः किं प्रवृत्तिपरशब्दत्वं वा। तद्व्यापारो नियोगो वा भावना वा।
सेवनियोज्यप्रयोज्यं फलिका वा। इष्टत्वं वा। संकल्पो वा वक्तुरभिप्रायो वा कार्यता वा। हेतुत्वं वा।
एवं विप्रतिपत्तौ वरमः प्रयोगो नमीपानां स वयु त्यतरेषाम प्रवर्त्तकत्वात् तथाहि न तावदाद्य।
अश्रुतवाक्यस्य बधिरस्यापि सन्ततस्य च प्रवृत्तिदर्शनात्। अग्निहोत्रादिवाक्यज्ञानं प्रवर्त्तक
ज्ञानानां प्रवृत्तिपरशब्दत्वा प्रकारकच यद्य। नापि द्वितीयः अनिधायाः पदार्थस्मृतिहेतुभूतपद
तदर्थसंबंधात्र संकेतरूपाद् भिन्नायाम् असिद्धेः। नापि तृतीयः। भावनाज्ञानस्याप्रवर्त्तकत्वात्। तस्या
श्च सर्वलकारवाच्यत्वादसाधारण्येन लिङ्गानुष्यर्थतानुपपत्तेः। न च करोतीत्यादौ कृतः स्वगोच
रताविरोधेन सजातीयारंभकत्वनिषेधेनच संख्येवाख्यातार्थ इति वाच्यं आख्यातोपस्थाप्यकृते
रन्वयेपि तदुपस्थाप्यानुकूलत्वं समादाय धात्वर्थकतरन्वयसंभवात् तत्व सर्वलकारेषु कृतिर

६४२

शेभानात्। यौ तास्तु फलमात्रानुकूलव्यापाराभिधायित्वं वा। फलविशेषानुकूलव्यापाराभिधा
यित्वं वा नोभौ। अवश्यापजीव्यत्वेन विशेषणांश एव फले शक्तिकल्पनस्योचितत्वात्। यथा का
ष्ठं न भवतीति तथा पाकेन भवतीत्यत्रापि प्रयोगप्रसंगाच्च। अस्तु तर्हि नियोज्यप्रयोजन
फलिकाभावनेति पक्षः तथाहि। नियोज्यस्य प्रयोजनं निसर्गसुंदरतया स्वर्ग एव स्वर्गका
मो यजेतेत्यादिवाक्यादवगम्यते। लिङ् विहितभावनाया फलापेक्षणात्। समभिव्याहारव
शात् स्वर्गस्यैव भावनान्वयः। न चांतरंगतया यज्यर्थेनैव लिङर्थस्य साधनभावेनोपवाच्यपेपा
न एव भाव्यतया प्रतीयते बहिरंगतया नु स्वर्गे इति वाच्यं। यामं गच्छतीत्यादौ भाव्यमानेग
मनेग्रामसंयोगस्यैव भाव्यमानेयागे स्वर्गफलत्वेनाविरोधात्। तथा च स्वर्गफलयागजनिका
भावनेति वाक्यार्थनिष्पत्तौ भवति तद्ज्ञानाद्यागे स्वर्गकामस्य प्रवृत्तिरिति मतं। एतदपि मं[illegible]। नर
न्यामहे। भावनाज्ञानस्य भावनापामतंत्रत्वादित्युक्तप्रायत्वात्। स्वर्गफलो याग इति प्रवृत्तु

पपत्तेरधिकस्यानिवेशाच्च। एवमंगीकारे प्रतिज्ञान्तरापातात् हितोपायनाविधिप्रवेशाच्च। ना
पि पंचमः। इष्टत्वं हि इच्छाज्ञानस्याप्रवर्तकत्वात्। किंच। इच्छा किं विषयविशेषणमुपलक्षणं वा।
नाद्यः। इच्छायामपि प्रवृत्तिप्रसंगात्। न द्वितीयः। विकल्पासहत्वात्। तथा ह्युपलक्षणं सुखत्वा
दिकं वा। चिकीर्षाजनकज्ञानविषयत्वं वा। अन्यद्वा। नाद्यः। स्वर्गादिज्ञानेपि यागादिनियतत्वस्यानुपपत्तेः।
फलस्य च सिद्धस्य प्रवृत्त्यगोचरतयाप्युत्पाद्यत्वात्। अननुगमाच्च। न द्वितीयः। चिकीर्षाजनकज्ञानवि
षयतावच्छेदकप्रकारस्य निरूप्यमाणत्वात्। न तृतीयः। तदनिर्वचनात्। इष्टत्वज्ञाने प्रवृत्तौ सागरमण
वपि प्रवृत्तिप्रसंगात्। साध्यत्वेन विशेषणीयमिति चेत्। न। साध्यज्ञाने साधनविषयतानियमात् हि
तसाधनताविधिप्रवेशात्। किंच। किमिष्टत्वं। इच्छामात्रविषयत्वं वा। तद्विशेषचिकीर्षाविषयत्वं वा।
सापीच्छा फलस्य वाच्यार्थस्य वा। सापि किं वक्तुर्वा प्रतिपाद्यस्य वा। यस्य कस्यापि वा। नाद्यः। वक्तुः फले
च्छाया ज्ञानस्य प्रतिपाद्यस्य प्रवृत्तौ आज्ञाप्रेषणातिरिक्ताया अजनकत्वात्। प्रतिपाद्यफलेच्छायाः सत्याः

५७

स्यप्रवृत्तिः। न वेष्टोपायतामनेनानुमाप्रवर्त्तत इति वाच्यं। अनिष्टहेतोरव्याप्तेन वक्त्राज्ञायमानत्वा
त्। द्वितीयस्तु सा वक्त्राविशेषिता वक्त्रविशेषिता वा। आद्ये यथापि तज्ज्ञानादप्रवृत्तिः। अपि वा स्वे
प्रयोगप्रश्नो नराहत्वाहितमज्ञानाद्यनुपपत्तिर्नैतदेवं नवद्धिर्न्नेष्टोपपत्तादिति लिङर्थोऽस्त्युपेयते
न्नं वक्त्रभिप्रायार्थेऽपि ममेदं चेष्टाक्रियमाणमिष्टमतः कुरु किमित्येवं कर्तव्ये तस्य तत्कृति
साध्यमभिप्रेतमित्यादर्शनयहेतोरत्रापि सत्वात्। इदमपि नाङ्गीकारमर्हति। न वेच्छार्थत्वमाज्ञा
दौ कृतमिति तदनुरोधेनात्रापि तथाकल्पने मम हेत्वप्रयोगानुपपत्तेरेव। नाप्यष्टमः। तथाहि
किं तत्कार्यत्वं कृतिसाध्यतामात्रं वा। स्वकृतिसाध्यतामात्रं वा। स्वकृतिसाध्यत्वे सत्युद्देश्यता
मात्रं वा। नाद्यः। कृतिसाध्ये विषभक्षणादौ प्रवृत्तिप्रसंगात्। स्वकृत्यसाध्ये परकृतिसाध्यता
मादाय प्रवृत्तिप्रसंगाच्च। न द्वितीयः। अनिष्टेऽपि स्वकृतिसाध्ये प्रवृत्तिप्रसंगात्। न तृतीयः। उ
द्देश्यत्वस्यैव निर्वक्तुमशक्यत्वात्। तथाहि। किमुद्देश्यत्वमिच्छामात्रविषयत्वं वा इच्छाविषयत्व

५८

प्रवृत्तेर्येन तद्बोधकसङ्कल्पनिष्प्रयोजनत्वात् असत्योप्रतिपाद्यगतफलेच्छायाः स्वज्ञानेनप्रवृत्तावजनक
त्वात्। नापि चान्त्यर्थगोचरत्वं द्वितीयः पक्षः धात्वर्थस्य साधनत्वापरिचयो विद्यमाने प्रयोज्येच्छाविषयक
ज्ञानेऽप्यप्रवृत्तेः प्रतिपादकेच्छाया धात्वर्थगोचराया प्रतिपाद्यं प्रत्यप्रवर्त्तकत्वमित्यस्योक्तप्रायत्वात्।
न तृतीयः अतिप्रसंगात्। द्वितीयोपि न तद्विशेषचिकीर्षेति पक्षः उक्तोत्तरत्वात्। अथाप्यस्तु संकल्पः
षष्ठः पक्षः तथा हि स्वप्रवृत्तौ यद्धेतुत्वेनावगतं तदेव परप्रवृत्तावप्यनुमिनुयात् स्वप्रवृत्तौ च कार्यमिष्टो
पायं अतः कुर्यामिति संविकल्पस्याद्भुतत्वमवधारितं सविकल्पं विना हितोपायतानुसंधानेपि प्रवृत्तेरभावा
दावश्यकत्वात्। शब्दज्ञायामपि प्रवृत्तौ संकल्पज्ञानमेव हेतुर्योनुमिनोति। तथा च स एव लिंगाद्यर्थः त
न्नासंकल्पस्य चिकीर्षारूपत्वेन तत्कदोषाकुलत्वात्। अतिरिक्तश्चेमानाभावात्। किंचेदमत्रालोचनीयं॥
किं यस्मिन् ज्ञाते प्रवृत्तिरथ यस्मिन् ज्ञातो प्रवृत्तिः संलिङाद्यर्थः। आद्ये ज्ञानस्यापि प्रवर्त्तकज्ञानविषय
त्वावकल्पनप्रसंगः। द्वितीये संकल्पस्य स्वरूप पत एव प्रवर्त्तकत्वात् कथमसौ ज्ञाप्यः। सत्त्वमस्तु वक्तुरात्रिप्रा
प्याज्ञानं वा। इच्छा वा। आद्ये अग्निकामस्य दारुमयनत्वावनानुज्ञाति निज्ञानमुत्पाद्यं। न चैतावता प्रयोज्य

पितस्यैव निर्वक ---- नोपांत्यः। अमस्या चिकीर्षाजन्यकृतिसाध्यत्वेन तत्रापि प्रवृत्तिप्रसंगात्।
चिकीर्षाज्ञानस्यापि प्रवर्तकत्वप्रसंगाच्च। नांत्यः। तदनिर्वचनात्। न चरमः पक्षः। तथाहि।
मत्कृतिसाध्ययागसाध्यः स्वर्ग इत्येतदेवाप्तिसंधापयागे प्रवर्त्तकं। इदमेव परेषां कार्यताप
देन विवक्षितं। स्वप्रवृत्ताविदमेव ज्ञानं सत्कारणं बालस्यापि स्तनपानादिप्रवृत्तौ संस्का
रवशादुन्नेयम्। न च साधनतया समस्तज्ञानसंविन्संवेद्यतयाविनिगमताविरह इति वाच्यं। स
मानसंवित्संवेद्यत्वस्यैवासिद्धत्वात्। तथाहि यागसाध्यः स्वर्ग इत्यत्र यागनिरूपितनियतो
त्तरतावः। स्वर्गे प्रतीयते। ननु स्वर्गनिरूपितपूर्वकत्वं यागेन तु यत्र घटसाधनं दंड इति वा
क्यात् प्रथमतः पूर्वसाधनता प्रतीयते तत्र कितत्ज्ञानान्न प्रवर्त्तेत। अपा न तत्रस्तावदेवं किं
तु साधनताज्ञानेनं तु रं दंडः साध्यो घट इत्युत्तमाय प्रवर्त्तते। अत्र किं विनिगमनकमिति चेत्।
इष्टं। नत्वापि तावन्न कृतिसाध्यत्वमवश्य – यीजत्वं तच्च विशेषणं तु रमवश्य कल्प्यनि

५९

वच्छेदकरूपत्वं वा। चिकीर्षाविषयत्वं वा। चिकीर्षाविषयतावच्छेदकरूपत्वं वा। इच्छामात्रकारणी
भूतज्ञानविषयत्वं वा। चिकीर्षाकारणीभूतज्ञानविषयत्वं वा। चिकीर्षाकारणीभूतज्ञानविषयतावच्छेद
करूपत्वं वा। कृतिसाध्यत्वे सति स्वरूपमेव वा। चिकीर्षाकृतिसाध्यत्वं वा। अन्यथा नाद्यः। स्वानिष्टपर
प्रवृत्तिप्रसंगात्। न द्वितीयः। सुखदुःखाभावयोरेव प्रवृत्तिप्रसंगात्। यागादाविष्टोपायत्वातिरिक्तस्या
वच्छेदकस्य निर्वक्तुमशक्यत्वात्। न चेष्टत्वमेव तदवच्छेदकमात्माश्रयप्रसंगात्। न तृतीयः। चिकीर्षाज्ञान
स्यापि प्रवर्तकत्वप्रसंगात्। अन्योन्याश्रयप्रसंगात्। चिकीर्षायां सत्यां तद्बोधने यागे चिकीर्षावि
तस्मिन्नसतीति। नापि चतुर्थः। अननुगमात्। अननुगतस्य निर्वक्तुमशक्यत्वात्। शक्यत्वे वा पजीव्यत्वेन
तज्ज्ञानस्य प्रवर्तकस्यैवोचितत्वात्। न पंचमः। परेच्छाकारणीभूतज्ञानविषयेऽपि प्रवृत्तिप्रसंगात्।
स्वीयविशेषणेऽपि ज्ञानज्ञानस्य प्रवर्तकत्वापत्तेः। अत एव न षष्ठः। नापि सप्तमः। तस्यैव ज्ञानस्य निरू
पयितुमशक्यत्वात्। नाप्यष्टमः। स्वरूपमात्रज्ञानस्य अप्रवर्तकत्वात्। स्वरूपविशेषानिष्पाते

कृतिसाध्यविशे[illegible]ण्येवमितिचेत्। न। अन्यकृतिप्रमाणकारीर्यादावपि प्रवृत्तिप्रसंगात्। स्व
कृतिसाध्यविशेषणेनैवमितिचेत्। न। स्वकृतिसाध्येष्टसाधनेऽस्यानिष्टसाधने प्रवृत्तिप्र
संगात्। इष्टत्वमपि स्वीयत्वेन विशेषणीयमिति चेत्। न। तथा स[…]तत्रीनतोजने प्रवृत्तिप्रसं
गात्। साध्यत्वसाधनत्वयोर्विरोधाच्च। न हि यदेवोत्तरमावितदेव पूर्वं चापि संभवति॥ नि
रूपकभेदेनाविरोधे पूर्वदोषापरिहारात्। स्वकृतिव्यतिरेकेणापपन्नासिद्ध्यति। श्चे(?) इष्टसा
धनश्चेति। ज्ञानानैतरोषाद् इति चेत्। न। वान्येष्टसाधने प्रवृत्तिप्रसंगात्। यत्र प्रतिसंधान
त्वं तदिष्टत्वं विवक्षितं वर्तमानेच्छाविषयत्वमिति चेत्। न। इच्छाज्ञानस्यापि प्रवर्तकत्वप्र
संगात् इच्छाविषयत्वावच्छेदकरूप[…]त्। प्रतिसाधनत्वमिति चेत्। न। इच्छाज्ञानस्यापि प्रव
र्तकत्वप्रसंगात्। इच्छाविषयत्वावच्छेदकरूपवत्। प्रतिसंधानत्वमिति चेत्। न। नश्वदेव
इच्छोपलक्षणानविशेषणमिति चेत्। न। स्वर्गापवर्गगतस्यैकस्योपलक्षणस्यानां

यं। तद्रूपं साध्यत्वं कल्पनास्तु न तद्धि ज्ञातीयं साधनत्वमेव। न तद्द्वितीयपक्षे गौरवात्। प्रथम एव ज्या
यान् इदमेवोक्तं ने परेषामणुरपि विशेषोऽध्यवसायप्रकुर इति न च फलविशेष्यकेन प्रत्ययेन क
थं साध्यप्रवृत्तिरिति वाच्यं। साधनस्यापि प्रकारतया तद्विषयत्वात्र विशेष्यत्वस्य प्रवृत्तावतन्त्र
त्वात्। कृतिसाध्यो यागः स्वर्गसाधक इति यागविशेष्यकस्यापि ज्ञानस्य संभवादिति। मैवं। य
थासाजात्यं तत्र विनिगमकं तथा ममापि कृतकृतिसाध्यताप्रकारस्य साधनतासामाना
धिकरण्ये विनिगमकं। तथा च साध्यसाधनताज्ञानस्यैव प्रवर्तकत्वे केवलं। न तु साध्यप्रयोजन
ज्ञानस्य। किंवा। कृतिसाध्यत्वमुपजीव्यमेव नेष्यते। अपि कृतिसाधनको यागः स्वर्गसाध
नको यागः स्वर्गसाधनमिति ज्ञात्वा प्रवर्तते। तथा चाणुरपि विशेषोऽध्यवसायप्र इति त्र
न पचेद् कपदे नैपतन्नपातमालंबते। तत्र विनिगमनाविरहे पि न काचित्क्षतिरिति ज्ञेयं। नन्व
नभिष्टसाधन[illegible]नस्यापि न प्रवर्तकत्वं असाध्येपीष्टसाधने प्रवृत्तिप्रसंगात् इष्टत्वमे

कार्यतावि[शि]वादिनो। निराप्यो न विज्ञानात्। तथा हि विकीर्षाज्ञानत्वेमिव प्रवर्तकत्वप्रसंगः

ज न्मकृतिसाध्यत्वमेवावत्कार्यत्वं नविरुद्धं तावदेव प्रकृतचिकीर्षाज कृतिसाध्यत्वमेव तावत्कार्यत्वं नविकी

तस्याः कृतिविशेषणोपलक्षणत्वात्। तस्यैव कृतिविशेषस्य गुणपात्वं न ङीकारवादीनो यदि

चिकीर्षाकारत्वं निर्वाहार्थं स्वीकर्तव्यत्वात्। अन्यथा कीदृशं प्रपत्ते प्रतिविकीर्षाकारणं स्या

त्। प्रयत्नमात्रे व्यभिचारात् तद्गुणपातिवादिनानुवरण प्रसारिकापाद प्रसंजनत्वात्। पाव

त्कृतिविशेषसाध्यत्वमेव विधिः। कृतिसाध्येष्टसाधनत्वापेक्षया तस्य सञ्चीतवर्गीय

वर्गीदावप्रतिसाधारणत्वाद्यानवपमेपि प्रवृत्तिप्रसंगः। एवमस्या विकीर्षापकृतिसा

ध्यत्वात् द्वेषयोनिप्रयत्नोदपित्रमदर्शनाद्या न च विकीर्षावकृतिसाध्यत्वं ततो न नोपना

प्रवृत्तिसंप्रेगः। सामान्यतइष्टापादानात् समयविशेषप्रकृत्यापादानचैतचात्रासा त्ति।

र्षा

शाधु

६१

वेनतु गमात्। किंचेष्टोपायताज्ञानमिच्छाद्वारकं कारणं तदेच्छायां न कृत्वे सति सिध्यति। इत्थं जनक
त्वं चेष्टसाधनताज्ञानस्य संभवति। स्वर्गादावपि चिकिर्षादर्शनात्। तथा हि। किंचिस्येच्छामा
त्रं वा जन्येच्छा विशेषं चिकीर्षा या न तावदप्येते। उपायज्ञानं विना स्वर्गे तोच्छादर्शनात्
द्वितीयः स्वर्गवदावपि चिकीर्षादर्शनात्। कृत्यासाध्यपि तु मिच्छा हि। चिकीर्षा मा स्वर्गादौ न द
न दृष्टत्वात्। किंचेष्टसाधनं चास्य न विधि कृत्य हरहः संध्यामुपासीतेत्यादाविष्टं वेन
तदुपायासंभावात्। फलं जनकं यदि वादे वोपायता विधिपदे किं निषेध्यो दुष्टोपायत्वमिति
चेत न हि फलं जनकं किंचिदिष्टसाधनं पपुद्यासह ह्याइतिसाधनं विधीयनइति चेन्न।
तथा संभावात् क्रियात्वं विधापिचाश्वा न च बलवदनिष्टानुबन्धित्वे निषेध्यते इति तदेवमपि दिव
द्धादिदनिष्टानत्वं चनीष्टसाधनत्वं विधिः स्यात्। नन्वेव। किंतु बलवदनिष्टानुबन्धप्रतिसाधनत्वा
नस्य प्रतिबंधाव[illegible]मिति न चेतावपि कार्यत्वं न निगूढ एतावादव त्र कृतिसाध्यमिति चेन्न

भूतकृतेरपि दंडाद्युत्पत्तिदर्शनात्। किंवा अनुपायेऽप्यर्थी प्रवर्त्तमानो यदि कृतिविशेष
साध्यताज्ञानात्प्रवर्त्तेत इति स्वीकर्त्तव्यं। तदानुपायताप्रतिसंधानदशायामपि चिकीर्षाजन्य
कृतिसाध्यत्वज्ञानसंभवात्। तत्रापि प्रवृत्तिप्रसंगः। न चात्रानुपायताप्रतिसंधानमेव
निवर्त्तकं एवं सति अनुपायताप्रतिसंधानाभावः कारणमिति वाच्यं। तथा च उपायताप्र
तिसंधानमेव स्वीकर्त्तुमुचितं लाघवात्। एवं मंडलीकरणादावपि स्वर्गकामश्चिकीर्षाज
न्यकृतिसाध्यताज्ञानात्प्रवर्त्तेत इति वाच्ये तथा च तत्र तस्य सत्वात्तद्बाधकस्य प्रमाणत्वा
पत्तिः। न च तत्र स्वर्गसाधनताबाधाच्चिकीर्षाजन्यकृतिविशेषसाध्यताबाध इति युक्तं
असाधनेऽपि तथात्वे भूतकृतिचिकीर्षासंभवस्य पूर्वमेव कृतत्वात्। न चावश्यसाधनतालिंग
ककार्यताज्ञानस्यापि प्रवर्त्तकत्वमिति वाच्यं व्यभिचारेण लिंगत्वायोगात् न चेष्टसा
धनतालिंगककार्यताज्ञा मं यागादौ संभवत्यपि। कार्यताविधिपक्षे इष्टसाधनस्यैव वाला

६२

ध्यसावेनापादकयात्।न्नावित।तच्चेवं स्वर्गार्थिस्तु विकीर्षायिकृतिसाध्यताज्ञानता प्रवर्त्ततेतस्व
र्गार्थी विकीर्षायिकृतिसाध्यार्थ चतुर्दण्डीदिसाधारणमतस्तत्रापि प्रवृत्तिप्रसंग इति।मेवं।
स्वर्गेष्टसाधनतालिंगविकीर्षाजकृतिसाध्यताज्ञानस्य प्रवृत्तिं प्रतियनचानन्वतद्धेतो
रेचास्कतेमा।किमितिन्यायेनइष्टसाधनताज्ञानमेववर्त्तप्रवर्त्तकमस्तिविरवाभ्यं।इष्टसा
धनतालिंगकविकीर्षायकृतिसाध्यताज्ञानस्य प्रवृत्तिप्रयनत्वोकेर।नववहेतोस्वा
तेनकिमितिन्यायेनइष्टसाधनताज्ञानमेवप्रवर्त्तकमस्त्विति वाच्यं इष्टसाधनताज्ञानेप
स्य न्याजस्य कल्पत्वान नवदंडदोनथाप्रतं ज्ञानयदार्थौ तेप्रतो न्नमोत्त्रवति।तदानएव।
ष्टस्त्रीचितिविकीर्षाजन्य कृतचेनरूपेणायत्कृतिसाध्यंतत्ज्ञानस्य प्रवर्त्तकत्वमिति॥ ॥७॥
सत्रोच्यते॥ ॥तदर्थविकीर्षाजन्यकृतित्वेनरूपेणसाध्यत्वं तत्साधनेपि नास्ति।अन्यथा त्वमौ
त्र प्रवृत्तस्य घटपटादिविकीर्षाजन्यकृतितः दंडाद्युत्पत्तिर्नस्यात्।नवान्तेष्टापत्तिः तथा।

अविनाभावत्वेन हि तत्र विधिकल्पनं व्याप्यबाधशंकावारणार्थं वा। नत्र साधनतालाभार्थं। नचिच्छात्वाव
च्छिन्नकार्यताप्रतियोगिककारणतावच्छेदकं ज्ञाननिष्टं किमिति न वक्तव्यं। अनुगतं न किंचिदि
ति ब्रूमः। तर्हि ज्ञानस्येच्छायां कथं कारणत्वं स्वर्गेस्तु खलु प्रकारकज्ञानादुःखाभावे तु तत्प्रकार
कज्ञानात्वतदुपायेसाध्येपायात्ज्ञानात्वेनादिवदित्यवधातव्यं। अन्यथा कार्यताविधि
वादिनापि किमत्र वक्तव्यं। तथाहि। न तावदशा चिकीर्षाजन्यकृतिविशेषसाध्यताज्ञानं स
र्वत्रेच्छाकारणं। अस्माभ्योपि तद्वैकवद्डामण्यादावपीच्छादर्शनात्। कृतिविशेषसा
ध्यत्वाप्रतिसंधानेपि स्वर्गादाविच्छादर्शनादित्यलमतिपीडया। ननु हितोपायताविधि ६३
वादिनं न कलिंजभक्षणे इत्यादौ किं निषेध्यं। न तावत् कलिंजभक्षणस्य हितोपायत्वं बा
धादिति केत्वात्। नापि बलवदनिष्टाननुबन्धित्वं। तद्ज्ञानस्याप्रवर्तकत्वेन तस्य विधि
प्रत्ययानुपस्थाप्यत्वात्। तदुपस्थिते नैव निषेधान्वयात्। न च बलवदनिष्टानुसंधाने

थं १

त्वात्। यथा कैश्चिज्ज्ञावेवादेव प्रवर्त्तकं अस्तु। कार्यताज्ञानेपि तस्योपजीव्यत्वात्। नहि कार्य
ताज्ञानमात्रं प्रवर्त्तकमित्युक्तं प्राक् दृष्टसाधनतारूपलिंगधीपूर्वककृतिविशेषसाध्य
ताज्ञानापेक्षया कृतिसाध्येष्टसाधनताज्ञानस्य लघुत्वात्। तवत्तत्र पंममतद्वयमपि
विपरितमापतितं। अत एवानानौलोक्ये मंडलीकरणादौ साधनताज्ञानमात्र प्रवर्त्तौ
।पि विशेषदर्शनानंतरं कृतिविशेषसाध्यताप्रतिसंधानेपि न प्रवर्त्तीत। तस्मा
द्रष्टव्यतोस्तु दरे विषयेयावत्कृतिसाध्येष्टसाधनता प्रतीयते। तावदेवोपाया
र्थी चिकीर्षति मनोरथमात्रमेव परेषां तदुपजीवनेतदेव युक्तमुत्पश्यामः।
नच साधनता विधिपक्षेतरैतिमध्येतरति ब्रह्महत्यां योश्वमेधेन यजत इत्य
नेनैव साधनतालाभात्। नानेन साधनताप्रतिपादकविध्यनुमानमिति वाच्यं।

+ यत्कैश्चिदुक्तं प्रत्यवायविरोध्येवापूर्वं संध्योपासनेन जन्यते +१

प्रमाणाभावात् । नापि कलंजभक्षणप्रागभावः साध्यतस्यानादित्वेनासाध्यत्वात् । न च यथा
गवालंभस्यापि पुरुषार्थत्वात् प्रागभावपरिपालनमेव साध्यं वाच्यं । न प्रागवस्थोत्तरा
वधित्वनियमेन तस्य परिपालनस्याशक्यत्वात् तदन्यस्य तत्र निषेधस्यासंभवादिति न
च हरहः संध्यामुपासीतेत्यत्र किमिष्टं यत्संधानत्वं बोध्यं न तावत्प्रत्यवायपरिहारः प्रा
क् प्रत्यवाये प्रमाणाभावात् । नापि रात्रिकृतपापाभावः । सर्वत्र तदभावात् नित्यताबाधा
च । अहरहः स्नायादित्यत्र तदभावात् । न चात्रोपासने प्रत्यवायपदं अतस्तदभावः एवो
पासनेसाध्यत इति वाच्यं । उपासनसाध्यं त इति वाच्यं । फलत्वेन साधनत्वेनानन्वयापत्तेः
न चोपासनेनप्रयोजनं संभवति तद्धि सुखं वा । गौणं वा । नाद्यः सुखदुःखाभावयोरव
त्वात् । नेतरः सुखप्रयोजनोपायस्यैव तत्त्वात् । न च संध्योपासनेन किंचित्प्रयोजनं
जन्यते । तच्च प्रत्यवायविरोधित्वे न काम्यं न त्वपूर्वत्वे नापूर्वं कृतेरिष्यपि पूर्वोक्तेनैव वि

पिप्रवृत्त्यापत्तिः ननु प्रतिबंधकस्य प्रागेव आघ्रावदितत्वात् । नवक्रियान्वये पि निषेधस्यप्र
ज्ञातिष्ठायप्रज्ञामहं कुर्वीतिनानुयाजेष्विति यथा अनुयाजेतरयजतिषु पर्युदासः न अथी
लभ्यते तथात्रापि अनिष्टसाधनमित्यर्थः पर्यवस्यतीति वाच्यं वाक्यभेदप्रयासगत्यंत
राभावात् अत्र तथाकल्पनात् । अत्र तदभावादिति । मैवं । बलवदनिष्टाननुबंधज्ञा
नस्य हि प्रवृत्ति प्रतिबंधकत्वे तदभावस्य कारणताख्यातदा विति गमनाभावात् । तदज्ञा
वबलवदनिष्टाननुबंधज्ञानविधौ उपकारणत्वात् । एवं बलवदनिष्टाननुबधीष्टसा
धनताविधिरितिस एव लिङादिप्रत्ययवाच्यः । तथाच बलवदनिष्टाननुबंधेन विधि
प्रत्ययोपस्थाप्ये न विशेषणे ननत्रोन्वयइत्यानिच्छयापि स्वीकर्तव्यं अन्यथा कार्यता
विधिवादिनापि किं वक्तव्यं । नहि तस्यापि विकीर्षाजन्यकृतिसाध्यत्वं केलिङलक्षणस्य नि
षेध्यं बाधात् । नापि कलंजलक्षणे निवृत्तिर्नियोगो वाच्यः । फलाभावेन तत्प्रवृत्तौ तन्नियोगे

×वेदबोधितकर्तव्यत्वप्रत्ययानंतरमरुचिरितिकर्म्मेत्यादिवाक्यादेवंनुसंधानादनुपासनस्य×१ श्रो ५
तु कथं गौणत्वं किंविरुद्धप्रयोजनजनकं हि गौणं भवति। न चानेन किंविरुद्धप्रयोजनं जन्यते। ए
तदपि। नासाधनताज्ञानजन्येच्छाविषयत्वस्यैव गौणलक्षणार्थत्वात्। एतदस्ति हीति चेन्न। य
द्यपि हि न स्वतः संध्योपासनस्य किंविरुद्धप्रयोजनं प्रति साधनता तथापि अनुपासनस्य प्र
त्यवायप्रतियोगिकसाधनताज्ञानजन्येच्छाविषयत्वात् तदभाववत्त्वेन संध्योपासनस्य संभ
वत्येव। यथा सर्पोपसर्पणे दुःखहेतुज्ञानजन्येच्छाविषयत्वं तदभाववत्त्वेनापसर्पणस्ये
ति वक्तव्ये एवं संध्योपासनस्य प्रयोजनत्वेन व्यवस्थिते तत्सद्भावनाय। एवं इष्टोपायत्वेनाव
गयद्यालिंङ्पदे नोपस्थिता पीष्टसाधनता इष्टाभावात् संध्योपासने नान्वीयते।
न चैतावतेष्टसाधनताहान्यापत्तिलिंङादिरिष्टसाधनतायामेव शक्तेरवधार
णात्। न चैवं कथं संध्योपासने प्रवृत्तिरिष्टोपायतायाः अभावादिति वेत्। आपा
ततस्तावदेवं उपासनस्य प्रत्यवायफलत्वे अवगते तद्व्यतिरेकरूपस्योपासनस्य

काम्यत्वमवधार्यतदुपायेप्रवर्त्ततेनतुफलानएवतदुपासनस्यायोग्यत्वात्। प्रकारणाद्युप

स्थितोपासनोपायेनिवसाधनतांचपश्यन्नपिकश्चिन्नचेष्टसाधनताविधिपदोपि

इच्छाज्ञानंप्रवर्त्तकंस्यात्। इच्छाविषयतावच्छेदकप्रकारवत्त्वप्रतियोगिकसाधनताज्ञानं

प्रवर्त्तकंस्यपिनसमीचीनं अत्रापिइच्छाविशेषणमुपलक्षणंवा। आद्येतज्ज्ञानस्यप्रव

र्त्तकत्वापत्तिः द्वितीयेअननुगतस्यैकस्योपलक्षणस्याभावात्। अननुगमापत्तिः नवेच्छात

त्त्वेनशक्तिकल्पनायुक्ता इच्छायाःस्वरूपसत्याएवप्रवर्त्तकत्वात्। नवेष्टत्वमुपल

क्षणीकृत्यस्वर्गोपायत्वादावेवविधिप्रत्ययस्यशक्तिः अनेकार्थत्वप्रसंगात्। नवसा

धनतामात्रेशक्यंतन्मात्रज्ञानस्याप्रवर्त्तकत्वात्। सिद्धांतव्याकोपाच्चेतिमेवं। साधन

तामात्रमेवविधिप्रत्ययशक्यं। नचैतावतालकारांतरसाम्यापत्तिः विधिप्रत्ययस्यतर

लकारसाधारण्येनानुकूलप्रयत्नोपस्थापकत्वेप्यसाधारण्येनसाधनतोपाअपफ

तत्क्रियात्वा। नाद्यः। प्रमाणत्वाभावात्। द्वितीये तु तत्र प्रवृत्तिः स्यादित्यत्र प्रवृत्तिपदेन किमभिप्रेतं प्र
यत्नमात्रं वा। तद्विशेषः प्रवृत्तिर्वा। नाद्यः। इष्टापत्तेर्न दोषः। तव त्वेव जीवनयोनिः प्रयत्नोऽपि यतः
प्रयत्नः। नापरः। प्राणादिपूर्वकक्रियायाः मृत्युसाध्यत्वात्। जीवनयोनिप्रयत्नसाध्यक्रिया
न चासौ कृतिः। चिकीर्षायोनिप्रयत्नस्य कृतित्वेनाभिमतत्वात्। अन्यथेष्टसाधनताधीलिंग
ककार्यतानुमानात्र वा पितत्र प्रवृत्तिप्रसंगः समान इति स्खलतः प्रमादः। किं वा कृतिसाध्येष्ट
साधनताज्ञानं चेद्भवति एतावता प्रवर्त्तत इति एवं तिनेष्यते। अपि त्वेतावतैव प्रवर्त्तते यत्र
त्वन्यथासिद्ध्यादिकं प्रतिबंधकमापतति तत्राप्रवृत्तावपि न कारणतानुकृतिरिति किं वारं ६
वारं मर्म्मोद्घाटनेन। तिप किंचिदुक्तं फलेच्छाज्ञाते वोपपद्यते तद्-दयवचनमिति उपकरणीय
यमेव तथात्वे प्रमाणाभावादित्यास्तामत्र विस्तारः॥ १८॥ छ॥ इति विधिप्रकरणमिति॥ छ॥
ननु स्वर्गोपायत्वेन कार्यत्वेन रूपेण वा क्रियायाः अन्वय इति न युक्तं। तत्र नियोज्यकर्तृत्वात्

नमेवयुक्तं अतएव विश्वजिता यजेतेत्यत्र तावन्नाच्चयो याचेन्नेष्टत्वेन न स्वर्गोपस्थितिः कश्चित्तु न
राहहृष्टसाधनत्वमित्यत्र निरुधीच्छाविषयनिष्टत्वं मात्रं न पुनरिच्छाविषयत्वमात्रं तथा वस्व
र्गपि वाच्चयोन तु यागेनेति तन्न तथा वेहि अग्निकामो दारुणी मथ्नीयादित्यत्र साध्यत्वेनाग्नेरन्व
योन स्यात् तस्मात् बलवदनिष्टाननुबंधिसाध्य इष्टसाधनत्वमेवानिःफलानि इष्टफलाभ्यंव्याव
र्तमानं विधिरित्येव युक्तं। श्येनेनाभिचरन् यजेतेत्यत्र प्रायश्चित्तबलेन बलवदनिष्टानुबंधबो
धात्। तदत्तावेनन विधिरिति वेत्रान। तत्र योग्यतया साध्यत्वेन श्येपयस्यैवान्वयात्। अपि व
बहितम्लेच्छजनपदान्निवारमुद्दिश्य वेदश्येनयागनिषेधनं युक्तं। अन्यथा वेदप्रणेतुराप्तत्वं न
स्यात्। अतएव समस्तस्यैव विधेरन्वयायोग्यः तत्रादि वशात् विहितब्राह्मणान्निवारमुद्दिश्या
नुष्ठिते श्येने प्रायश्चित्तविधेरपि सा फलमिति। किमधिकेन। नान्वेवं जीवनतयो निष्पत्तसाध्ये ऽग्नि
होपापेच प्राणादिपंचके किमिति न प्रवर्त्तते। मैवं। प्राणादिपंचके हि जीवनयोनिष्पन्नसाध्यं।

वगमात्तावारा। कामीति कामस्यान्यत्र कामस्य व्यवहितसाधनमेव कर्तव्यतया बोधेति। न च सस्यार्थि
नः कर्षकस्य व्यवहितोपाये कर्षणे प्रवृत्तिदर्शनान्नायं नियम इति वाच्यं। तत्रापि व्यापार
परंपरामंतर्भाव्यैव तथावगमो नान्यथा। तथात्वे मानाभावात्। साक्षात्साधनतारूपविशे
षबाधे परंपरामादाये वसाम्यान्यप्रत्ययाच्च अत एव छिद्र घटबोधे छिद्रेतरत्वेन रूपेण
घटेन जलमाहरेत्यादौ घटान्वयप्रतिपत्तिः। ननु विधिप्रत्ययस्यापूर्वे केन रूपेण श
क्तिः किं कार्यत्वेन तत्क्रियातिरिक्तकार्यत्वेन। स्थिरकार्यत्वेन वा। अपूर्वत्वेन वा। अन्येन वा।
ना
आद्यैः क्रियासाधारण्यापातात्। द्वितीयः शक्यसाधारणस्य त्रिकालत्वानवच्छेदकत्वात्। अन्यथा प्र
मेयत्वेनैव सर्वत्र शक्तिः स्यात्। नेतरः घटादिसाधारण्यात्। नापरस्तु आदेव। नांत्यः पू
र्वमनुपस्थितेः उपस्थितौ वा पूर्वत्वव्यापातात्। न चरमः। निर्वचनात्रामेवं। स्थिरकार्य
त्वं कार्यत्वमेव वा पलरूपणी कृत्यपूर्ववर्तमानं लिङ्पदं तत्कर्तृसंपादनया। पूर्वत्वमवगम

यतिनचैवंनित्यनिषेधस्यपूर्वयोरत्वान्नप्रसंगोदोषएकत्रनिर्णीतेनान्यत्रापितथाकल्पनात् ॥
नचैवंपुष्टिकामोघृतंपिबेदित्यादावपूर्वागमप्रसंगः।वैदिकलिङ्त्वेननियमात्।यद्वालौकेकि
यामात्रस्यैवतद्व्यापारस्यधात्वर्थसामर्थ्यादेवलिङर्थत्वात्।नचनानार्थत्वापत्तिः।लोकेलक्षणा
योपपत्तेरिति॥ ॥अत्रोच्यते॥ ॥साधनत्वस्यक्रियायामन्वयायोग्यतयाव्यापारेशक्ति
रित्यन्तिमतंपरस्या।एतच्चानुपपन्नं।तथाहि।साकायोग्यतयाक्रियायांनास्तिनतावत्स
जातीयेऽन्वयदर्शना।केनहिप्रकारेणसाजात्यमितिमतमापृष्टतः।नतावद्येनकेनापिअ
ग्निनासिंचेदित्यादावपियोग्यतापत्तेः।नापिपदार्थत्वावच्छेदकेनप्रकारेणसाजात्यं।
अद्यजातोगौःपयःपिबतीत्यादौतदनावात्।नाप्यन्याकाचिद्योग्यताअशक्यनिर्वच
नात्तस्माद्बाधकप्रमाणाभावएवसा।साचात्रसाधनत्वेनप्रकारेणविद्यतएवनहि
साधनत्वेनरूपेणनन्वयनिश्चयःकेनापिप्रमाणेननचानियमतोव्यापारपरंपरामा

६८

र्थ्यं। तस्माच्छ्वनयागजन्यत्वं व्यभिचारात्। नच परमाणुक्रियेव काचिद्विशेषरूपा याग
जन्यासावुनयागव्यतिवर्त्तीति वाच्यं। तद्विशेषकल्पनायां कल्पनागौरवात्। अक्लृ
प्तकारणविशेषकल्पनेन कारणांतरप्रत्याख्यानऽतिप्रसंगात्। अतएव न समय
कलापरंपरापि यागव्यापारः। किंचानुत्रवेप्येवंविधव्यापारेणान्यथासिद्धः सं
स्कारोपि न सिद्ध्येत्। ननु व्यापारं विनापि यागः स्वर्गं प्रति कारणमस्तु। न च चिर
ध्वस्तस्य व्यापारद्वारा कारणता दर्शनात्। व्यापारं विना कारणत्वानुपपत्ति
रिति वाच्यं। व्याप्तौ प्रमाणाभावात्। अन्यथा कारणं निरन्वयध्वंस्तस्यापार कारणताप
त्तिः। कारणत्वस्यैव विशेषत्वादिति एतदपि नास्ति। कारणत्वस्य कार्याव्यवहित
पूर्वसमयवर्त्तित्व तद्वृत्तिव्यापारकत्वान्यतररूपनिततत्वादिति संक्षेपः॥ ॥२०॥ छ॥
अत्रान्यथाख्यातिं तावत्संप्रदायसिद्धां विप्रतिपन्नयः। अरजतं रजतत्वंप्रकारकज्ञा

त्वादनेनफलप्रवाहापत्त्यानिर्म्मोक्षापत्तेरितिचेन्न। तावत्समयजनकत्वस्यात्राव्यवस्था
पूर्वइवध्वंसेपिकल्पनात्। धर्मिकल्पनातोधर्मकल्पनालघीयसीतिन्यायगरुकत्वात्। धर्मः
क्षरतिकीर्त्तिनादित्यनेनधर्मस्यध्वंसप्रतियोगित्वमवगम्यते। नत्वध्वंसस्यनसंभव
तीतिविरोधस्तत्रापश्चित्ताविधिवैकल्पप्रसंगात्। यागप्रतिबंधकतानयाद्यनैवमि
तिचेन्न। अस्तुतावदेवंतथापिसाक्षादेवयागेनशरीरविशेषएवंजन्यतेतेनचसम
यान्तरेस्वर्गोजन्यते। पक्षांतरेकलापरंपरैवव्यापारोस्तुक्रियायाएववास्त्वेतं
कल्पनामितिमैवं। नतावत्शरीरस्यव्यापारकत्वंप्रलयशरीरबाधेपिप्रलया
नंतरंस्वर्गादिरूपस्यफलस्यप्रामाणिकत्वात्। प्रपैलेतच्छरीरंनविश्यतीतिचेन्न।
धर्मिग्राहकेणप्रमाणेनप्रलयस्यसकलकार्यद्रव्यानाशरसमयत्वेनसिद्धत्वात्। किं
वाशरीरंप्रतिनतावद्यागस्यसाक्षात्जनकत्वंसंभवति। अतःपरमाणुक्रियाद्वारावन्न

तथाहि। तत्रायमर्थः रजतार्थिप्रवृत्तिं प्रति कारणत्वं प्रवृत्तिसमानविषयरजतत्वप्रका
रावच्छिन्नविषयताप्रतियोगिज्ञानत्वेनावच्छिद्यते न वा। इदं च विप्रतिपत्तिवाक्यार्थः। नन्विय्या
ख्यातौ अपि तु तथ्याप्यविप्रतिपत्तेः स्वविषयसंशयजननद्वारा विचारानुकूल
त्वं अनयाश्च विप्रतिपत्त्या समानविषयकश्च संशयः कर्त्तव्यः तेन समानविषयक एव
विचारः प्रवर्त्तयितव्यः तद्विषयश्च नान्यथाख्यातिरूपः। अपि तु तथाप्यरूपः। न च व्या
पकसिद्ध्यर्थं कथायां व्याप्यसाधने गच्छतैर्अप्राप्तकालत्वात्। न चाविशिष्टस्य कारण
तावच्छेदकत्वानिषेधेनान्यथाख्यातिर्निषिद्धा न चनीतिमत्त्वान्प्रमादः इति मेवं। रजत
त्वावच्छिन्नज्ञानविषयता अरजतनिष्ठानवेतिनैवासाधारण्यं दोषः। एतावतापि न्य
×अरजतनिष्ठात्वंताभावप्रतियोगिनीनवेत्येवं विप्रतिपत्तिः रजतत्वप्रकारिकाविषयता×१ शोधु

जतेर्
पा०

७१

शुक्तिरजते रजतत्वप्रकारकस्य ज्ञानविशेषपक्षत्वात्॥४

नविषयो न वा। रजतज्ञानं अरजतविषयकं न वा। अरजते रजतत्वप्रकारकविषयताश्रयो न
वा। रजतत्वप्रकारिकाविषयता वा। अरजतनिष्ठा न वा। ज्ञानं स्वविषयताव्यधिकरणप्रका
रकं न वा। इदं ज्ञानं व्यधिकरणप्रकारावच्छिन्नविषयताकं न वा। ज्ञानं विशिष्टज्ञानत्वे
न प्रवृत्तिजनकं न वा। नाद्योऽर्थांतरत्वात्। असम्बद्धालंबनरूपतया प्कपपत्तेः। नापि द्विती
यः। अतएव न तृतीयः। अन्यथाख्यातिवादिना नेति कोटेरसिद्धेः। रजतत्वप्रकारकवि
षयत्वस्यैव केवलान्वयिनो गीकारात्। नापि चतुर्थः। साधारण्यात्। नापि पंचमः।
सामान्यतो प्रसिद्धेः। नापि षष्ठी। परं प्रत्यसिद्धेः। व्यक्तिविशेषविवक्षायां असाधारण्या
त्। किं च इदं ज्ञानमिति सत्यरजतज्ञानं वा विवक्षितं शुक्तिकागोचरं वा। नाद्यः। तत्र व्यधि
करणप्रकारावच्छिन्नत्वे साध्ये बाधप्रसंगात्। नेतरः। परं प्रत्यसिद्धेर्बाधिकत्वात्। नापि सप्तमी।

तिरेकाच्चामेव व्यवहारादिकारणत्वं मानसप्रत्यक्षसिद्धं यथा सत्यरजतज्ञाने भवति।
तथा विपरीतरजतबोधेपि कथमन्यथा शुक्तौ रजततयाज्ञातेति व्यवहारो बाधाव
तारेपि तद्विदकृक्ष्मावार्थीः संसर्गः क्वापि न सिद्धदिति। एदपि नास्ति। शुक्तौ रज
तसाक्षात्कारस्य कारणबाधेन साक्षात्त्वबाधे शुक्तौ रूप्यतयाज्ञानेति व्यवहार
स्य प्राचीनत्वेदायहनिबंधनत्वात्तथाहि। रजतसाक्षात्कारे रजतेन्द्रियसंनिकर्षः
कारणं। तद्व्यतिरेकेण शुक्तौ कथं तदुत्पत्तिसंभावनापि। न च साक्षात्कारमात्रवि ३२
शेषेन्द्रियसंकर्षः कारणं तद्विशेषे च रजतसाक्षात्कारे तद्विशेषेन्द्रियसंनिकर्षः का
रणं विशेषविशेष्यविशेषसंनिकर्षस्यैव कारणत्वेनांगीकाराहित्वादिति। वाच्यं क्व
चिद्विशेष्यासंनिधानेपि साक्षात्कारत्वमस्यत्वयांगीकाराद्। तथाहि। साक्षात्कृर्वं

थारव्याति विचारानुकूलत्वान पापारायच्छज्ञानत्वं यथार्थत्वव्याप्यं नवा। यद्वज्ञौ विषयत्वं
स्वप्रकारात्यंत्ताभावसमानाधिकरणं नवा।। एवं विप्रतिपत्तिः। व्यवस्थितो विचारसंत्तवे प्रा
मोकुराणामयमाशयः। रजतयाशुक्तिज्ञाने तत्र रजतव्याहार व्यवहारान्यथानुपपत्त्या
स्वीकर्त्तव्यं तयोश्चरजतत्वप्रकारकज्ञानसाध्यत्वं। तत्र स्मरणरूपंहत्तमेवानत्तुव्यवहर्त्ती
व्यविशेष्यकरजतत्वप्रकारकज्ञानजन्यताव्याहारे व्यवहारयोः गौरवात्। नचपत्रकृत्राविं
द्रजतज्ञाने सर्वत्र व्यवहारादिति प्रसंगो दोषः। अत्रेदव्यवहारेभेदाग्रहस्यसंसर्गव्यवहा
रे संसर्गाग्रहस्य च नियामकत्वात्। अवश्यवत्त्वमवादिनापि नियमार्थमंगीकार्यत्वात्।
सत्यजे रेतस्थलेपि भेदाग्रहादेवतदुपपत्तौ विशिष्टस्याप्रयोजकत्वात्। नत्तुज्ञानं व्या
हारादिं कस्य नायमिति नांगीकर्म्मः। किं त्तुमानसप्रत्यक्षसिद्धत्वात्। तस्या वाच पक्व
ना २

त्यापत्तेः। तथा च शुक्ताविदं रजतमेवेति ज्ञानादुपस्थितेष्टानिष्टेनेदाग्रहसहितास्ववृत्ति
निवृत्तियोग्यपद्यापत्तेः। न च तत्रानिष्टेनेदाग्रह एवेति वाच्यं। अन्यथाख्यातिस्वीकारा
पत्तेः। न च स्वातंत्र्योपस्थितानिष्टेनेदाग्रहस्य निवर्त्तकत्वमिति वाच्यं। स्वातंत्र्यस्य वक्तु
मशक्यत्वादिति। एतदपि न साधीयः। अज्ञातावाविशेषणतयोपस्थितानिष्टेनेदाग्रहक
स्य निवर्त्तकत्वात्स्वनिवर्त्तकत्वमप्यज्ञातावाविशेषणतयोपस्थितेष्टेनेदाग्रहस्यैवेति। तेन
सत्यरजते नेदं रजतमिति कृत्वा न प्रवृत्त्यापत्तिस्तस्य प्र॰ कृते अज्ञातावारोपद्याज्ञारो
पितनियमार्थमवश्यं नेदाग्रहे विशेषः स्वीकर्त्तव्यः। स च विशेषः प्रवृत्तिप्रयोजक
एवास्तु। न च प्रकृते तथाविशेषः अन्यथोत्पन्नेदाग्रहासंशयप एवस्यान्नविदं रज
तमेवेति विपर्ययः। ननु स्थाणौ स्थाणुपुरुषसंशयानन्तरं पुरुष एवेति व्यवहार
स्तावरदृश्यात्। तत्र च न नेदाग्रहस्य निमित्तत्वं स्थाणौ पुरुषनेदाग्रह एव तत्र स्थाणौ

वस्तुदृष्टानंतरमन्यत्रगत्वाचिंतयतो भवतिस्तस्थाणुःस्यात्पुरुषोवेतिसंशयः। नवज्ञानधर्मिक
एवसंशयस्तत्रेतिवाच्यं। ज्ञानत्वानेपितथासंशयापात्। एवंविपर्ययोप्यूहनीयः। नवतत्रदो
षस्यैवसन्निकर्षत्वंविषोक्ताप्रत्यासत्तिर्बहिरिन्द्रियेणतस्यासन्निकर्षत्वात्। नन्वतत्रज्ञानोत
रापनीतेमनएवकरणंपुंसोबहिर्विशेष्यकेमनसोऽस्वातंत्र्यात्। ज्ञानांतरोपनयऽन
स्यतद्विशेषणकएवसाक्षात्कारिप्रयोजकत्वात्। परमाणुमहदज्ञानामीत्यत्रतथाद
र्शनात्। अन्यथानुमित्यादेरुच्छेदापातात्। अग्रहपक्षेचस्वदोषस्यासंजनत्वात्। ननु
भेदाग्रहस्यप्रवृत्तिरनुपपन्ना। तथाहि। यथोपस्थितेष्टभेदाग्रहस्यप्रवर्तकत्वंतथो
पस्थितेनिष्टभेदाग्रहस्यनिवर्तकत्वंवाच्यं। नविष्टभेदाग्रहस्य। तथात्वेसत्यरजतादे
वनेदंरजतमितिज्ञात्वाननिवर्त्तेततत्रेष्टात्तदंग्रहस्याभावात्। भावेवाविपरीतख्या

नवात्। तस्मात् धूमग्रहापेक्षानियमेन वह्न्यर्थिप्रवृत्तौ निर्विकल्पको वह्निमनुमिमीतिरूत्यचित
इत्यवश्यं स्वीकर्तव्यं किंच कथमत्रानुमिनोमीति व्यवहारश्च त्वन्मते स्यात्तत्र ह्यनुप
स्थितविशेष्य असंसर्गग्रहणे पीतः शंखः इत्यादौ साक्षात्करोमीति व्यवहारस्य
त्वयेष्यमाणत्वादिति। एतदपि न साधु। पूर्ववद् असंसर्गाग्रहसत्वेपि निर्विकल्पकत्वासं
सर्गाग्रहस्याविद्यमानत्वात्। ततः कथं धूमप्रतिसंधानानंतरं प्रवृत्तिः कथं वह्न्यर्थी
प्रवर्तेत। बाष्पपूरे धूमप्रतिसंधानानंतरं नियमतो वह्न्युपस्थितौ तदसंसर्गाग्र
हाद् वह्न्यर्थी निःकंपं प्रवर्तते। अनुमिनोमीति व्यवहारस्यापि लिंगोपस्थापितव्या
पकासंसर्गाग्रह एव निबंधनं। तस्मादेतावतापि नान्यथाख्यातिसिद्धिरिति। किंचान्य
थाख्यातिपक्षे इदं रजतमिति ज्ञानस्य को विषयः। शुक्ती रजतं वा। अनयोस्तादात्म्यं

७४

नेदायहस्यापिविद्यमानत्वादेककोटिकव्यवहारानुपपत्तेःसंशयतादवस्थ्यंवस्था
त्।एकस्मिन्पक्ष्येरेरविरुद्धेनेदायहस्यतवसंशयत्वात्।नचात्रस्थाणुत्वेदयहप
वविपरीतख्यातिप्रसंगात्।तस्मादगत्याविपरीतख्यातिःस्वीकर्त्तव्येति।मैवं।
संशयानंतरंस्थाणौपुरुषएवायमितिव्यवहारोपिपुरुषत्वेदायहादेवोपपद्य
ते।नचसंशयतादवस्थ्यं।स्थाणुत्वोपस्थितपरस्परविरुद्धोभयकोटिनेदायह
स्यसंशयत्वादत्रापिपुरुषएवायमित्यत्रानावविशेषणतयास्थाणोरुपस्थितत्वा
त्।अन्यथातवापिपुरुषएवायमित्यत्रसंशयोत्पत्तिप्रसंगः।नन्वेवंसयोग्यह
येतिचेद्वत्तिःसर्वत्रतदावच्छ्यथिप्रवृत्तौधूलीपटलधूमप्रतिसंधानापेक्षात्
स्यात्।उपस्थितवह्निसंसर्गायग्रहार्थसेतिचेत्।नापूर्वमपिवह्न्युपस्थितिसंभ

इतिजनकत्वमवश्यंवाच्यं।तथावानन्वनुगमकत्वदवस्थएवेति।मैवं।रजतेनेदंइरजतेदाग्र
हसंसर्गंवादिप्रवृत्तिजनकत्वात् विपरीतेरजतनेदाग्रहस्यविसंवादिप्रवृत्तिजनकत्वा
दिपूर्वपक्षसंक्षेपः॥ ॥अत्रोच्यते॥ ॥रजतत्वप्रकारकस्यज्ञानस्यरजतव्यवहार
कारणत्वमितितावदविवादं।तत्राव्यवहितत्वविशेषकत्वस्य।तत्त्वेअतिप्रसं
गवारकर्षणेनेदायग्रहोपेक्षणीयः।सोपिनयस्यकस्यापिकिन्तुरजतस्यनवापत्र
क्त्रापिकिन्तुपुरोवर्त्तिनितथाचरजतप्रतियोगिकभेदग्रहाभावः पुरोवर्त्तिनिर
जतव्यवहारेनियामकइत्यभिमतं।तथाचपुरोवर्त्तिनिरजतभेदविषयकग्रहाभा ७५
वस्यव्यवहारनियामकत्वमस्तु।पुरोवर्त्तिनिरजतत्वग्रहणस्यवा।तत्राद्येगौर
वमतो।द्वितीयएवज्यायान्।नन्वेवमन्यथाख्यातिस्वीकारेगौरवप्रसंगः।प्रमा

वा। शुक्तिरजतयोः सामानाधिकरण्यं वा। रजतत्वेन प्रकारेण शुक्तिर्वा। नाद्यः सम्प्रा-
लंबनेनाप्युपपत्तेः। न द्वितीयः। असत्ख्यातिप्रसंगात्। अत एव न तृतीयोऽपि। न चतु-
र्थोऽपि तृतीयार्थो निर्वचनात्। किं च दोषाणां प्रकृतकार्यप्रतिबंधकत्वं दृष्टं न तु कार्यवि-
शेषजनकत्वं कथमन्यथा दुष्टात् कुटजबीजात् न्यग्रोधांकुरो न जायते। न च नेदाग्रह-
पकेनेदं रजतमिति ज्ञानेन किं बाध्यते इदमिति ज्ञानं वा रजतमिति ज्ञानं वा। न तावदाद्यः।
दृष्टत्वात्तस्य दृष्टतादवस्थ्यात् स्यात्। नेतरः। तत्र तस्यापि कविसत्वात्। तस्माच्छुक्तौ र-
जतत्वं ज्ञानेन निषिध्यते रजतानेदो वा। तत्र यथापि बाधकबलेनान्यथाख्यातिसि-
द्धिरिति। मैवं। नेदाग्रहप्रसंगात्। तालेदव्यवहारस्य बाध्यत्वात्। न च नेदाग्रहस्य
प्रवर्तकत्वं संवादलक्षणप्रवृत्तिवैचित्र्यं न स्यात्। तस्माद् नेदग्रहस्य संवादित्व

वप्रमाणाम अहंकारणत्वेन गोचरीकरोति गौरवपराहतेरुक्तत्वात्। नवक्वचिद्वि
शेषाः सन्ति कर्षोपि बहिर्विशेषकत्वमस्वीकारेण कारणबाधात्तद्बाध इतिपुकं
ज्ञानांतरोपनीतेन बहिर्विशेषणकज्ञानेन तज्ज्ञातः परमाणुरित्यादौ बहिर्विश
ष्यकज्ञानस्यापि संत्वात्। कार्यदर्शनस्यान्यत्रापि समानत्वात्। नचान्त्रामि
त्य, छेदप्रसंगः। अत्र व्रतीयलिंगपरामर्शस्थलेविशेषस्योक्तत्वात्। न चस्वात
त्र्योपस्थिता निष्टनेदाग्रहस्य निवर्तकत्वं परस्परानात्वविशिष्टं आकिरजत
इति ज्ञानात्स्युक्तो रजतार्थी न निवर्तेत। किंच। इमेरंगरजते इत्यत्रस्वातंत्र्योपस्थि
तेष्टानिष्टनेदाग्रहस्य विद्यमानत्वात्। किमिति न प्रवृत्तिनिवृत्ती स्यातां।
न च यत्र यान्तिष्टेन साधेप्य नयत्रस्मारितं तत्र नाङ्ग्दाग्रहस्यनियामकत्वमि

णवतो गौरवस्यापि न्याय्यत्वात्। न वान्यथाख्यातिकारणतया भेदाग्रहस्य स्वीकर्त्त
व्यत्वात्तस्यैव व्यवहारकारणत्वमस्त्विति वाच्यं। अन्यथाख्यातोच्छिन्नतायां तत्राग्रहका
रणत्वकल्पनाया अवितत्वात्। न त्वेवं व्यवहारे तत्राग्रहकारणतायामेव विवाद
न रजतज्ञानस्यावश्योपजीव्यत्वात् तादव प्रवर्त्तकमस्तु। तथापि प्रवृत्तिसमान
विषयकत्वमनुपजीव्यं। सत्यरजतस्थले तद्दैवायातमिति चेन्न। प्रवृत्तिसमान
विषयकत्वस्यानुपजीव्यत्वेपि प्रसंगात्। न च तद्धारणार्थमग्रहएवोपासनीयः
अन्तरंगन्यायेन प्रवृत्तिसमानविषयत्वोपासनाया एवोचितत्वात्। न च सर्वत्रै
नयवादिसिद्धत्वादग्रहस्यैव कारणता न्याय्या विशिष्टज्ञानस्य तु नयवाद्यसिद्ध
त्वादिति वाच्यं। न ह्युनयवादिसिद्धत्वं कारणत्वस्वीकारे प्रयोजकं किंतु प्रमाणं। न

प्रकाण्डजननदर्शनात्। अन्यथादोषात्क्वापिकथंविसंवादिनीप्रवृत्तिःस्यात्। नचज्ञानस्यायथार्थविस
माश्वासाभावः। विसंवादिप्रवृत्तिजनकत्वेनसमानत्वेनोभयवादिसमाधेयत्वात्। नचभेदाग्रहःप्र
संज्ञिताद्भेदव्यवहारस्यबाध्यत्वं। व्यवहारोहिप्रवृत्तिर्वाशब्दप्रयोगोवा। नाद्यः। नहिनेदंरज
तमितिज्ञानंप्रवृत्तिंबाधतेप्रवृत्तेःसर्वत्राभावात्। नापिप्रवृत्तियोग्यतांअशक्यत्वात्। नद्वितीयः॥
नहिनेदंरजतमितिज्ञानस्यपुरोवर्त्तिनिरजतशब्दप्रयोगोनास्तीतिविषयः। अनन्तरंचविरोधात्।
नचरजतभेदाप्रकारकंपुरोवर्त्तिज्ञानंरजतोपस्थितिसहायंपुरोवर्त्तिनिप्रवर्त्तयति। पुरोवर्त्ति
निज्ञानेयद्भेदावभासंतेनतुरजतप्रतियोगित्वंनगृह्यते। एवंवाप्रवर्त्तते। अग्रहपदंनपर्युदा
समर्यादयाग्रहविशेषस्यैवविवक्षितत्वादितिवाच्यं। सत्यरजतेनेदंरजतमितिज्ञात्वापिप्रवर्त्तेत
नहितत्रपुरोवर्त्तिज्ञानंरजतभेदप्रकारकंनवातत्ज्ञानविषयोभेदोरजतप्रतियोगित्वेनगृ
ह्यतेन्यथाख्यातिस्वीकारापातात्॥ किंच। कोसौभेदोयस्याग्रहोव्यवहारयति। नतावत्स्वरूपं
इदंरजतमित्यत्रस्वरूपग्रहस्यविद्यमानत्वात्। नापिवैधर्म्यंवैधर्म्यस्यकिंस्वरूपेणग्रहात्ते

७७

तिवाच्यं। अनुभूयमानारोपसत्यरजतस्थले च तदज्ञानाद्वा। न च तत्रारजते अरजतभेदग्रहएव नचा
न्यथाख्यातिः॥ अरजते रजतभेदासंसर्गाग्रहस्यैवारजते भेदग्रहार्थत्वादिति वाच्यं। सत्यरजतस्थले अरजत
भेदासंसर्गाग्रहस्यापि विद्यमानत्वात्तद्वृत्तिदशायामपि प्रवृत्तेः। शुक्तौ नेदं रजतमिति ज्ञानेपि रज
तभेदासंसर्गादृक्गपक्षे वृत्तिनिवृत्तिप्रसंगात्। न च तत्र रजतभेदासंसर्गाग्रहोन्यथाख्यात्याप
त्तिः। न च तत्र भेदासंसर्गासंसर्गाग्रहान्निवृत्तिरिति वाच्यं। असंसर्गासंसर्गस्य संसर्गातिरिक्तस्याभा
वात्। ग्रहस्य व्यवहारानुत्पादकत्वाच्च। ननु किंविशेषनिष्ठकाननायदेव तत्र भ्रमे नियाम
कं तदेव प्रवृत्तौ वस्तु अन्यथा तत्त्वकिमिति भेदज्ञानं न जायते इति। एवं भ्रमनियामकस्य सत्यरजत
स्थलेऽभावात्। न च तत्र प्रवर्त्तनसादृश्यं हि तथा। न च तत्र सादृश्यमस्ति रजतसादृश्याभावात्।
भ्रमनियामकस्य तत्त्वनिरूपणीयत्वात्। भ्रमस्य त्वयानंगीकारात्। अंगीकारे वा विवादापर्यवसाना
त्। उपजीव्यप्रमाणविरोधाच्च। न च तृतीयार्थानिर्वचनप्रकारस्यैव तत्त्वात्। न च प्रकारनिर्वचनादो
स्थांउयवादिसमाधेयत्वात्। न च दोषस्य प्रवर्त्तकार्यप्रतिबंधकत्वमात्रं दवदग्धवेत्रबीजाकेदली

नेष्टसाधनतामनुमाय रजतार्थी प्रवर्त्तते न तु रजतत्वेदग्रहात्। आसादितेष्टसाधनतेदाग्रह इति संक्षेपः॥
॥ ॥इत्यन्यथाख्यातिवादः॥ ॥२१॥ ॥इहार्थापत्तिरनुमानातिरिक्तं प्रमाणमिति परे मेनिरे। तत्र ते
षामयमाशयः। जीवतो देवदत्तस्य गेहाभावदर्शनेन बहिःसत्वं प्रतीयत इति तावत्सर्वानुमतं॥
तत्र न गेहाभावो हेतुर्व्यधिकरणत्वात्। न वा जीवित्वे सत्यभावो बहिःसत्वव्याप्त इति संबंधानंसा
वेषां। कथं वा द्विषासन्निकृष्टे देवदत्ते हेतोः पक्षधर्मताग्रहः। न वतां विनाप्यनुमानमतिप्रसं
गात्। एवं पीनो देवदत्तो दिवा न भुंक्त इत्यत्रापि तावन्निशाभोजनमनुमीयते। न वात्रापि व्याप्त्या
दिग्रहणीयमइति पूर्ववदूहनीयं। न तु बहिःसत्वमात्रं विनानुपपत्तिर्देवदत्तबहिःसत्वं विना ७८
वा। नाद्यः। एवं वह्निबहिःसत्वमात्रं कल्प्येत न तु तद्देवदत्तस्य। द्वितीये तदीयं बहिःसत्वं प्रतीतम
प्रतीतं वा। आद्ये किमर्थापत्त्या परिच्छेद्यं तदीयबहिःसत्वस्य प्रमाणान्तरादेव सिद्धेः। द्वितीये तु
कथमप्रतीतेनानुपपत्तिनिरूपणं। अनिरूपितायानुपपत्तिः कथं गमिका इति प्रसंगात्। अतु

दाग्रहो वैधर्म्यत्वेन वा। न तावदाद्यः। वस्तुगत्यापाद्यधर्म्ये तद्ग्रहेऽपि व्यवहारस्यादर्शनात्। नापि द्विती-
यः। वैधर्म्यस्यानंतानंतावत्वेन निर्वचनात्। अनंतानंतावस्यस्वरूपादन्यस्य त्वयानंगीकारात्। किंच
यत्किंचिद्वैधर्म्यस्य सर्वत्र ग्रहात्तदीयत्वेन विशेषणेनाननुगमात्। नाप्यन्योन्याभावः। तस्य त्वया-
नभ्युपगमादिति। किंच भेदाग्रहस्य प्रवर्तकत्वे सत्यरजतस्थलेन संभवति। तथाहि। तत्र पुरोव-
र्त्तिनि रजतभेदस्याग्रहो वाच्यः। येन केनापि वा। नांत्यः। अतिप्रसंगात्। अन्यभेदाग्रहेऽपि प्रवृत्तेरद-
र्शनात्। नाद्यः। अप्रसिद्धेः। नापि पुरोवर्त्तिनि रजतत्वप्रकारकाभेदग्रहस्याभावेऽपि प्रवृत्तेरदर्शना-
त्। न च तत्र रजतत्वेन रूपेण पुरोवर्त्युपस्थितिरेव न वृत्तेति वाच्यं। विशिष्टज्ञानप्रयोजकत्व-
प्रसंगात्। न च चाकचिक्यादिना रजतोपस्थितिः कारणमिति वाच्यं। गेहे रजतमिति चाकचिक्यादपि
न प्रवृत्तिदर्शनात्। तत्र चाकचिक्याद्यभावात्। नापि पुरोवर्त्तिनि रजतत्वप्रकारकाग्रहस्तस्याभा-
व इति वाच्यं। अन्यथाख्यातिस्वीकारप्रसंगात्। अप्रसिद्धत्वाच्च। तस्माच्छुक्तौ रजतमेवेदं प्रतीयते

एवं हि सः ॥ यदि देवदत्तो बहिरसन् स्यात् । जीवित्वे सति गृहेऽसन्न स्यात् इति । यद्वा सत्त्वग्राहकं प्रमा
णं यद्यभावग्राहकप्रमाणसमानविषयकं स्यात् तदाऽप्रमाणमेव न स्यादिति । प्रतिसंधानमेवात्र का
रणं । व्यावस्थितमनुमापकमव्यवस्थितं कल्पकमिति वचनादिति ॥ ॥अत्रोच्यते॥ ॥कास्यानु
पपत्तिर्यस्याः करणत्वं । व्याप्तिपक्षधर्मतावगमं विना बहिःसत्त्वं विना गृहसत्त्वाभावः सेति चे
त् । नन्वयमविनाभाव एव वह्न्यमेव व्याप्तिस्तथा चानुपपत्तिर्व्याप्तिरित्येक एवार्थ इति नाममा
त्रपरिवृत्तिः ॥ एतेन व्यतिरेकमानमर्थापत्तिरिति निरस्तं । व्यतिरेकिण्यपि व्याप्तिपक्षधर्मताधी
नत्वसंभवात् । तथा चानुपपत्तेरपि नामान्तरकरणमेव । न च लिंगाभावान्नानुमानता जीवितगृहा
सत्त्वस्यैव लिंगत्वात् । अर्थापत्तिवादिनापि गृहनिष्ठाभावप्रतियोगित्वग्रहस्याभ्युपेयत्वात् । य
था चानुरससन्निकृष्टे लिंग-परामर्शोदयस्तथा कं तृतीयलिंगपरामर्शस्थले । न च क्वचिद् दृष्टी
तिमाणस्य गृहगोचरतासंभावनाया गृहासत्त्वसंदिग्धं सत्कथं लिंगमिति वाच्यं । गृहासत्त्व

७०

मानंतुपक्षधर्मता बलाद्धि शिष्टबहिःसत्वसाधनमितिन तत्रानुपपत्तिरिति। मैवं। विशकलिते नैव बहिः
सत्वादिनानुपपत्तिनिरूपणात्। विशिष्टावगमस्त्वर्थापत्तेरेव फलं। एवं दिवाभोजित्वे नैव पीनत्वा
नुपपत्तिनिरूपणं रात्रिभोजनं तु तेन क्वचिदपि न प्रतीतं अत एव नानुमानता साध्याप्रसिद्धेः। भोज
नं तु पुष्टिकारणतया कृत्स्नं समयांतरमादाय विश्राम्यति। विरोधप्रतिसंधानमेवाकरणं। तदेवा
र्थापत्तिरिति वाच्यं। फलं तु नरस्य सामान्यप्रवृत्तौ विशेषप्रवर्तमाणयोर्भिन्नविषयतयाऽविरो
धबुद्धिः। अत्र केचिदुक्तं। विरुद्धधर्माध्यासप्रतिसंधानाद्वा नयोर्भिन्नविषयत्वं सिद्धमिति किमर्
र्थापत्त्या। न च विरुद्धधर्माध्यासासिद्धिः। अस्तित्वनास्तित्वलक्षणस्य तस्यानुभवसाक्षिकत्वात्।
अन्यथा विरोधप्रतिसंधानानुपपत्तिरिति। एतदपि न। सामान्यतोऽनेदावगमेपि गृहान्यत्वेन गृ
हत्वेन तापरिच्छेदकस्य कस्यचिदस्तीति प्रमाणे अर्थापत्त्यधीनत्वात्। विरोधसंभावना। प्रामाण्य
संभावाविरुद्धायाः करणं तादवार्थापत्तिस्थाने निवेशनीयं। तर्केवं ऐवा बहिःसत्वादिकल्पकोस्तु।

मरणमेव किमिति न कल्प्यत इति वाच्यं। क्वचिदस्ति तावच्चिरजीवित्वग्राहकप्रमाणद्वयबाधप्रसंगा
त्। बहिःसत्वकल्पनेव गृह एवेति नियमग्राहकमेव मानं बाध्यं इत्यस्ति लाघवमिति। मैवं। संश
यस्य करणत्वे मानाभावात्। अनयोरेकं प्रमाणमस्तीति सामान्यतो दृष्टेनैकत्र एव हि प्रमाणे
लाघवं सहकारित्वं च अन्यथा। फलनिःसरणाभावात्। अन्यथान्यत्राप्येवं विषयचरणप्रसा
रिकाया संशय एव करणं स्यादिति गतं प्रमाणान्तरवार्त्तया। न च तद्धि करणं विपर्ययपर्यवसा
नादेव साध्यसिद्धिः। एवं पक्षांतरमपि शक्यं निरसनमिति सर्वं समंजसं॥ ॥इत्यर्थापत्तिप्रकर
णं॥ ॥२१॥ ॥इह प्राभाकराः शब्दस्य नित्यत्वमिच्छंतो बकुधा बकुजिनीषिद्धा एवं तथापि तत्प्र ८०
तिषेधार्थं किंचिदुच्यते। तत्र तावत्तेषामयमाशयः। प्रत्यभिज्ञानं तावद्गकारादिगोचरं तावत्कालस्था
यिनं गकारं गोचरयदन्यत्वसिद्धं। तत्र तेन यद्यपि नित्यतानविषयीक्रियते तथापि तदुपजीव
नप्रवृत्तविचारान्नित्यतासिध्यति। तथा हि। कारणनाशाद्वा शब्दविनाशो विरोधिगुणाद्वा। का

स्यसंदिग्धत्वेकथमनुपपत्तिप्रतिसंधानंपरस्यापि।एवंजीवित्वसंशयेपि।अन्यथामरणकल्पना
पत्तेः।जीविनोदृग्गृहासत्वंव्यवस्थितसद्भावेबहिःसत्वंविनानुपपन्नंतत्कल्पकमितिदित्तदर्शनं।
किंच।क्वचिदस्तीतिप्रमाणस्यगृहविषयतासंदिग्धागृहेनास्तीतिप्रमाणेनगृहासत्वनिश्चा
यकंतथाचतेनैवतत्संशयनिरासः।निश्चितेसंशयाभावात्।अन्यथासंशयस्यानुच्छेद्यतास्या
त्।नचविरोधप्रतिसंधानमर्थापत्तिः।क्वचिदस्तिगृहेनास्तीतिप्रमाणयोर्विरोधाभावात्।तथा
पितत्प्रतिसंधानमस्तीतिचेत्।अस्त्वेवमपिनातिरिक्तस्तथाहिकोसौविरोधोस्तित्वनास्तित्वयोः
सहानवस्थानमितिचेत्।सहानवस्थानमेवतयोर्नक्लृप्तः।विपरीत्यनियमादितियदितथाच
व्याप्तिप्रतिसंधानमावश्यकमितिनकिंचिदेतत्।अस्तुतर्हिसंशयःकरणंतथाहितेशोवर्षजी
वित्वंज्योतिःशास्त्रादवगतंजीवीगृहेरावतिव्याप्तिरुपलब्धा।अनंतरंगृहेदेवदत्ताभावमुपल
भ्यसंदिह्यतेसचसंशयोलाघवाख्यंतर्कंसहकारिणमासाद्यबहिःसत्वमवधारयति।नच

ब्दस्य किं साधकं श्रुतपूर्वो गकारोऽयमिति प्रत्यक्षमेवेति चेन्न। अयोग्याधिकरणस्याभा
वस्यातीन्द्रियत्वात्। अन्यथा वायुस्पर्शध्वंसकस्याप्रत्यक्षतानस्यात्। नचेदं ज्ञानं लैंगिकं प्रत्य
भिज्ञा न बाधितत्वात्। आकाशगुणत्वेनसत्प्रतिपक्षत्वाच्च। प्रत्यभिज्ञानेत्रनकिमपि बाधकं
मिति नित्यतासिद्धिः। ननु पूर्वं नासीदिदानीं विद्यते गकार इति प्रत्यय बलादादिमत्वेसि
द्धे तत एव सांतत्वे सत्यनित्यत्वमेवं। यथेदानीं तथैवेदानीं नास्तीत्यत्र संयोगो निषिध्यते तथा
वनचनित्यत्वपक्षे कंठतालुसंयोगादिनेरपेक्ष्यं शब्दस्यादितिवाच्यं। अनिव्यक्तौ तथा
वात्। नव व्यंजकसाधारण्ये नसर्वशब्दोपलब्धिप्रसंगः। कंचिदव शब्दं प्रति कस्यचित्सं
योगस्य व्यंजकत्वात्। न च समानादेशत्वे समानेन्द्रियग्राह्यत्वे च प्रतिनियतव्यंजकव्यंग्य
त्वमनुपपन्नमितिवाच्यं। एकत्वेकपृथक्त्वादिवदुपपत्तेः। परिमाणादिनिर्व्यतिचारात्।
नचोत्कर्षापकर्षऽवत्वादुभयवच्छब्दानित्यतासाधनमिति युक्तं। नहि पाद्बोत्कर्षसामान्य

२१

रणनाशादपि समवायिकारणनाशाद्वा निमित्तकारणनाशाद्वा। नाद्यः। समवायिनो नित्यत्वात्।
न द्वितीयः। असमवायिकारणनाशानंतरमपि प्रत्यभिज्ञानदर्शनात्। एवं निमित्तनाशोपि न तृ-
